।।श्रीः।।

# महाकविश्रीमदम्बिकादत्तव्यासविरचितः

# शिवराजविजयः

(ऐतिहासिक उपन्यासः)

## अथ प्रथमो विरामः, तत्र प्रथमो निःश्वासः

**"विष्णोर्माया भगवती यया सम्मोहितं जगत्।"**

**(भागवतम् 10/1/25)**

**हिंस्रः स्वपापेन विहिंसितः खलः साधुः समत्वेन भयाद् विमुच्यते।**

**(भागवतम् 10/7/31)** **प्रसङ्गः –**

पण्डितः अम्बिकादत्तव्यासः प्रथमं मङ्गलमाचरति। अत्र प्रथमायां सूक्तौ भगवतो विष्णोर्मायाशक्तेः तत्प्रभावस्य च वर्णनम्, द्वितीयायाञ्च सूक्तौ दुष्कृतां विनाशं साधूनाञ्च परित्राणं निर्दिश्य शिवराजस्य विजयं यवनाधिपतेश्च विनाशं सूचयति।

**व्याख्या–** विष्णोः=सर्वव्यापकस्य भगवतो विष्णोः, माया=एतदाख्याशक्तिः, भगवती=ऐश्वर्यशालिनी (वर्तते), यया=मायया, (एतत्) जगत्=त्रिभुवनम्, सम्मोहितम्=मोहेन वशीकृतमस्ति।

हिंस्रः=हिंस्रस्वभावः, खलः=दुर्जनः, स्वपापेन=निजपातकेन, विहिंसितः=घातितः, साधुः=सज्जनः, समत्वेन=रागद्वेषरहितत्वेन, भयात्=भीतेः, विमुच्यते=मुक्तो भवति।

**सरलार्थः –** भगवतो विष्णोः ऐश्वर्यशालिन्या मायया इदं जगत् सम्मोहितं वर्तते। हिंसकः स्वपापेन मृत्युमेति, साधुश्च समत्वेग भयाद्मुक्तो भवति।

**विशेषः –** कदाचिदसुरैराक्रान्तेयं भूः गोरूपमाधाय ब्रह्माणमुपययौ, स च तदीयां व्यथां श्रुत्वा महेश्वरप्रमुखैर्देवैः सह क्षीरसागरतटमुपजगाम, ततश्च ते भगवन्तं विष्णुं तुष्टुवुः। स्तुतिकाले ब्रह्मा समाधिं जगाम समाधौ चाकाशवाणीमशृणोत्। तदनुसारं भूभारहरणाय भगवान् विष्णुः यदुकुले जनिं ग्रहीष्यति, अतः सर्वे देवाः तत्रैव साहाय्यार्थं जन्म गृह्णन्तु इति। भगवतः विष्णोः ऐश्वर्यशालिनी योगमाया अपि, ययेदं जगत् सम्यग् मोहितं वर्तते, साऽपि तदाज्ञया तल्लीलां सम्पादयितुमंशरूपेणावतरिष्यतीति भागवती कथात्राऽनुसन्धेया।

पुरा तृणायचपश्ख्यो दनुजः वात्यरूपं धृत्वा बालकृष्णमादाय खमुत्पपात। कृष्णश्च तं तथा कण्ठे जग्राह यथा असौ आत्मानं मोचयितुं न शशाक, अपितु विसंज्ञो निर्गतलोचनः सन् भूमौ पपात मृतश्चस श्रीकृष्णश्च तद्देहोपरि क्रीडितुमारेभे। तद्दृष्ट्वा गोपाः गोप्यश्च जगदुः – "हिंस्रस्वभावः पापःस्वपापेन मृत्युमेति, साधुजनश्च रागद्वेषरहितत्वाद् भयाद् मुच्यते।" इति भागवती कथाऽत्रानुसन्धेया।

**मूलम् – "अरुण एष प्रकाशः पूर्वस्यां भगवतो मरीचिमालिनः। एष भगवान् मणिराकाशमण्डलस्य, चक्रवर्ती खेचरचक्रस्य, कुण्डलमाखण्डलदिशः, दीपको ब्रह्माण्डभाण्डस्य, प्रेयान् पुण्डरीकपटलस्य, शोक–विमोकः कोकलोकस्य, अवलम्बो रोलम्बकदम्बस्य, सूत्रधारः सर्वव्यवहारस्य, इनश्च दिनस्य। अयमेव अहोरात्रं जनयति, अयमेव वत्सरं द्वादशसु भागेषु विभनक्ति, अयमेव कारणं षण्णामृतूनाम्, एष एवाङ्गीकरोति उत्तरं दक्षिणं चायनम्, एनेनैव सम्पादिताः युगभेदाः, एनेनैव कृताः कल्पभेदाः, एनमेवाऽऽश्रित्य भवति परमेष्ठिनः परार्द्धसंख्या, असावेव चर्कर्ति बर्भर्ति जर्हर्ति च जगत्, वेदा एतस्यैव वन्दिनः, गायत्री अमुमेव गायति, ब्रह्मनिष्ठा ब्राह्मणाः अमुमेवाहरहरुपतिष्ठन्ते धन्य एष कुलमूलं श्रीरामचन्द्रस्य, प्रणम्य एष विश्वेषामिति उदेष्यन्तं भास्वन्तं प्रणमन् निजपर्णकुटीरात् निश्चक्राम कश्चिद् गुरुसेवनपटुर्विप्रवटुः।**

**प्रसङ्गः –** अत्रादौ वस्तुनिर्देशात्मकं मङ्गलमाचरन् पं. अम्बिकादत्तव्यासः भगवन्तं भास्वन्तं वर्णयति–

**व्याख्याः –** पूर्वस्यायां=पूर्वदिशायाम्, भगवतः=ऐश्वर्यसम्पन्नस्य, मरीचिमालिनः =सूर्यस्य, एष=अयम्,

अरुणः=लोहितः, प्रकाशः=ज्योतिः, (अस्ति)। एषः=अयम्, भगवान्=सूर्यः, आकाशमण्डलस्य=अन्तरिक्षलोकस्य, मणिः =रत्नम्, खेचरचक्रस्य=नक्षत्रसमूहस्य, चक्रवर्ती=समाट्, आखण्डलदिशः =इन्द्रदिशः, कुण्डलं=कर्णाभूषणम्, ब्रह्माण्डभाण्डस्य=ब्रह्माण्डसदनस्य, दीपकः=प्रकाशकः, पुण्डरीकपटलस्य=कमलसमूहस्य, प्रेयान्=प्रियतरः, कोकलोकस्य=चक्रवाकसमूहस्य, शोकविमोकः=कष्टहरः, रोलम्बकदम्बस्य=भ्रमरनिकरस्य, अवलम्बः=आश्रयः, सर्वव्यवहारस्य= लौकिकसकलव्यवहारस्य, सूत्रधारः=प्रवर्तकः, (अथ च) दिनस्य=दिवसस्य, इनः=स्वामी, (अस्ति)। अयमेव=सूर्य एव, अहोरात्रं=नक्तन्दिवम्, जनयति =करोति, अयमेव=भास्कर एव, वत्सरं=वर्षम्, द्वादशसु=द्वादशसंख्येषु, भागेषु=खण्डेषु, विभनक्ति=विभजते, अयमेव, षण्णामृतूनाम्= वसन्तादिषड्तूनाम्, कारणं=हेतुः, एष एव=भास्कर एव, उत्तरं=उदीच्यम्, दक्षिणम्=अपाच्य, च, अयनं=स्वमार्गम्, अङ्गीकरोति=स्वीकरोति, एनेनैव =सूर्येणैव, युगभेदाः=युगविभागाः, सम्पादिताः=विहिताः, एनेनैव= भास्करेणैव, कल्पभेदाः=सहस्रदेववर्षात्मकाः कालभेदाः, एनमेव=सूर्यमेव, आश्रित्य=अवलम्ब्य, परमेष्ठिनः=विधातुः, परार्द्धसंख्या = परार्द्ध इत्यभिधा संख्या, भवति=सम्पूर्णतामेति, असौ=सूर्यः, एव, जगत्=संसारम्, चर्कर्ति =पुनः पुनः करोति, बर्भर्ति=पुनः पुनः बिभर्ति, जर्हर्ति=पुनः पुनः हरति, च, वेदाः=श्रुतयः, एतस्यैव=भास्करस्यैव, वन्दिनः=स्तुतिपाठकाः, गायत्री =एतदाख्यो मन्त्रः, अमुमेव=सूर्यदेवमेव, गायति=स्तौति, ब्रह्मनिष्ठाः= वेदपरायणाः ब्राह्मणाः=विप्राः, अमुमेव=आदित्यमेव, अहरहः=प्रतिदिनम्, उपतिष्ठन्ते=उपासते। श्रीरामचन्दस्य= दाशरथेः, कुलमूलं=आदिपुरुषः, एष=विवस्वान्, धन्यः,=महार्हः, एष=आदित्यः, विश्वेषां=सर्वेषाम्, प्रणम्य =वन्दनीयः, इति (विचिन्त्य) उदेष्यन्तं=उदीयमानम्, भास्वन्तं= विवस्वन्तम्, प्रणमन्=प्रणामं कुर्वन्, कश्चित्=कोऽपि, गुरुसेवनपटुः= गुरुशुश्रूषानिपुणः, विप्रवटुः=द्विजबालकः, निजपर्णकुटीरात्= स्वपत्रोटजात्, निश्चक्राम=निर्जगाम।

**समास–विग्रहाः** –मरीचीनां माला (ष.त.) सा अस्य अस्तीति, तस्य मरीचिमालिनः। खे चरन्तीति खेचराः (अलुक्उपपद तत्पु.) तेषां चक्रः (ष.त.), तस्य खेचरचक्रस्य। ब्रह्माण्डमेव भाण्डम् (कर्म.), तस्य ब्रह्माण्डभाण्डस्य। पुण्डरीकाणां पटलम् (ष.त.), तस्य पुण्डरीकपटलस्य। रोलम्बानां कदम्बः (ष.त.), तस्य रोलम्बकदम्बस्य। अहश्च रात्रिश्च (द्वन्द्वः), तयोः समाहारः तम् अहोरात्रम्। पर्णानां कुटीरः पर्णकुटीरः, (ष. त.) निजस्य पर्णकुटीरः, निजपर्णकुटीरः, तस्मात्। ब्रह्मणि निष्ठा येषां ते (बहु.), ब्रह्मनिष्ठाः। विप्रस्य वटु (ष. त.), विप्रवटुः। यद्वा विप्रश्चासौ वटुः इत्यादि।

**व्याकरणम्** – भगवतः–भग+मतुप्+ङस्। प्रेयान्ँप्रिय+ईयसुन्+सु। जनयति–जन्+णिच्+लट्+तिप्। आश्रित्य–आङ्+ श्रिञ्+क्त्वा > ल्यप्। चर्कर्ति–डुकृञ्+यङ् (लुक्)+लट्+तिप्। बर्भर्ति–भृञ्+यङ् (लुक्)+लट् +तिप्। जर्हर्ति–हृञ्+यङ् (लुक्)+लट्+तिप्। उपतिष्ठन्ते–उप+ स्था+लट्+झ। प्रणम्यः–प्र+नम्+यत्+सु। प्रणमन् –प्र+नम्+शतृ+सु। निश्चक्राम–निस्+क्रमु+ लिट्+तिप् (णल्)। ह्रस्वा कुटी कुटीरः, कुटी+र।

**विशेषः**–'आदौ नमस्क्रियाशीर्वा वस्तुनिर्देश एव वा' इति साहित्यदर्पणोक्त्या कविरादौ मंगलमाचरन् भगवन्तं सूर्यं स्तौति। तेन चात्र ओजस्विनः शिववीरस्य महिमा वर्ण्यते इति सूच्यते। अन्यच्च निखिलब्रह्माण्डस्य कर्तृत्व–पालकत्व–संहर्तृत्वेन वर्णनादत्र सूर्यस्य परब्रह्मत्वं साधयता कविना 'सूर्य आत्मा जगतस्तस्थुषश्च' इति श्रुतिवचनं पुरस्कृतम्। अत्र ब्रह्मचारिणः गौरवटोः सूर्यविषयिणी रतिरभिव्यज्यते। अत्र सप्रसादा वैदर्भी रीतिर्वर्तते। 'मणिराकाशमण्डलस्यः इनश्च दिनस्य इत्यत्र रूपकालंकारः, सूर्यस्य उदात्तवर्णनादत्र उदात्तालंकारोऽप्यस्ति।

**सरलार्थः** – पूर्वदिशायां भगवतः सूर्यस्योऽयम् अरुणप्रकाशो विद्यते। अयं भगवान् सूर्य आकाश–मण्डलस्य मणिः, नक्षत्राणां सम्राट्, पूर्व–दिशायाः कुण्डलम्, ब्रह्माण्डरूपसदनस्य दीपकः, कमलनिकरस्य अतिशयेन प्रियः, चक्रवाकाणां कष्टहरः, भ्रमरनिकरस्य अवलम्बः, निखिललोकव्यवहारस्य प्रवर्तकः, दिनस्य च स्वामी अस्ति। अयमेव अहोरात्रं जनयति, वर्षं द्वादशभागेषु विभजते, षण्णामृतूनां कारणम् अस्ति उत्तरं दक्षिणञ्च अयनम् स्वीकरोति। अनेनैव युगभेदाः कल्पभेदाश्च कृताः सन्ति। ब्रह्मणः

परार्द्धसंख्या एनमेवाश्रयति, अयमेव संसारं पुनःपुनः सृजति, बिभर्ति, संहरति च। वेदाः गायत्री च एनमेव स्तुवन्ति। ब्रह्मपरायणाः ब्राह्मणाः सर्वदा एनमेव उपासते। अयमेव भगवतो रामचन्द्रस्य कुलस्य आदिपुरुषः अस्ति। अयं सर्वेषां जनानां प्रणम्योऽस्तीति उदेष्यन्तं भास्वन्तं प्रणमन् गुरुसेवापरायणः कश्चिद् विप्रवटुः निजपर्णकुटीराद् निर्जगाम।

**मूलम्– "अहो। चिररात्राय सुप्तोऽहम्, स्वप्नजाल–परतन्त्रेणैव महान् पुण्यमयः समयोऽतिवाहितः, सन्ध्योपासन–समयोऽयमस्मद्गुरुचरणानाम् तत् सपदि अवचिनोमि कुसुमानि" इति चिन्तयन् कदलीदलमेकमाकुञ्च्य, तृणशकलैः सन्धाय, पुटकं विधाय, पुष्पावचयं कर्त्तुमारेभे।**

**प्रसङ्ग–** अत्र विलम्बेन उत्थितो विप्रवटुः खेदमनुभवन् पुष्पावचये प्रवर्तते।

**व्याख्या–**अहो!=अहो इति साश्चर्ये खेदे, चिररात्राय=चिरं यावत्, अहं=विप्रवटुः, सुप्तः=शयितोऽभवम्, स्वप्नजालपरतन्त्रेण=निद्रापरवशेन, एव=हि, महान् पुण्यमयः=अतिशयेन पुण्यप्रदः, समयः=कालः, अतिवाहितः=यापितः, अयम् =एषः अस्मद् गुरुचरणानां=मदीयाचार्यपादानाम्, सन्ध्योपासनसमयः =सन्ध्यावन्दनवेला, जात इति शेषः, तत्=तस्मात् सपदि=शीघ्रम्, कुसुमानि =पुष्पाणि, अवचिनोमि=संगृह्णामि, इति=एवम्, चिन्तयन्=विचारयन् एकं कदलीदलं= रम्भापत्रमेकम्, आकुञ्च्य=संकुच्य, तृणशकलैः=तृणखण्डैः, सन्धाय=संयोज्य, पुटकं=पुष्पस्थापनपात्रम्, विधाय=कृत्वा, पुष्पावचयं =कुसुमसंग्रहम्, कर्तुं=विधातुम्, आरेभे=प्रारभत।

**समास–विग्रहाः–** स्वप्न एव जालम् (क.धा.) तस्य परतन्त्रः (ष. तत्पु.), तेन स्वप्नजालपरतन्त्रेण। सन्ध्यायाः उपासनम् (ष.तत्पु.), तस्य समयः (ष.तत्पु), सन्ध्योपासनसमयः। कदल्याः, दलम् (ष. तत्पु), कदलीदलम्। पुष्पाणाम् अवचयः (ष.तत्पु.), तम् पुष्पावचयम्।

**व्याकरणम् –** सुप्तः–स्वप्+क्त+सु। पुण्यमयः–पुण्य+मयट्+सु। अवचिनोमि=अव+चिञ्+लट्+मिप्। चिन्तयन्–चिन्त+शतृ+सु। आकुञ्च्य–आ +कुञ्च्+क्त्वा>ल्यप्। सन्धाय–सम्+धा+क्त्वाझल्यप्। विधाय–वि+ धा+क्त्वा>ल्यप्। आरेभे– आ+रभ्+लिट्+तिप्।

**सरलार्थः –** अहो। चिरकालं यावद् अहमस्वपम्। निद्रावशंगतेन मया सुतरां पुण्यकालो यापितः। अयमस्माकं गुरुचरणानां सन्ध्योपासनसमयो वर्तते अतः शीघ्रमेव पुष्पाणि अवचिनोमीति चिन्तयन् (स विप्रवटु) कदलीपत्रमेकं त्रोटयित्वा तच्च तृणैः संयोज्य पुटकं विधाय पुष्पाणि चेतुं तत्परोऽभूत्।

**मूलम् – 'वटुरसौ आकृत्या सुन्दरः, वर्णेन गौरः, जटाभिर्ब्रह्मचारी, वयसा षोडश– वर्षदेशीयः, कम्बुकण्ठः, आयतललाटः, सुबाहुर्विशाललोचनश्चासीत्।**

**प्रसङ्ग :–** अत्र कविः ब्रह्मचारिणं वर्णयतिँ

**व्याख्या –** असौ=पूर्वोक्तः, वटुः=ब्रह्मचारी, आकृत्या=आकारेण, सुन्दरः=मनोहरः, वर्णेन गौरः=गौरवर्णः, जटाभिः=सटाभिः, ब्रह्मचारी=वटुः वयसा=अवस्थया षोडशवर्षदेशीयः=षोडशवर्षकल्पः, कम्बुकण्ठः=शंखग्रीवः, आयतललाटः =विस्तृतभालः, सुबाहुः=शोभनभुजः, विशाललोचनः=विशालनेत्रः, च, आसीत्।

**समासविग्रहाः –** कम्बुरिव कण्ठो यस्य सः (ब.ब्री.) कम्बुकण्ठः। आयतं ललाटं यस्य सः (ब.ब्री.) आयतललाटः। सु (शोभनौ) बाहू यस्य सः (ब.ब्री.), सुबाहुः। विशाले लोचने यस्य सः (ब.ब्री.), विशाललोचनः। ब्रह्म वेदः, तदध्ययनार्थं व्रतमपि ब्रह्म, तच्चरतीति ब्रह्मचारी (उप.स.)।

**व्याकरणम् –** आकृत्या–आङ्+कृ+क्तिन्+टा। षोडश– वर्षदेशीयः– षोडशवर्ष+ देशीयर्+सु। ब्रह्मचारी–ब्रह्म+चर्+णिनि+सु।

**विशेष :–**'कम्बुकण्ठ' इत्यत्र लुप्तोपमालंकारः। अत्र गद्यांशे ब्रह्मचारिणः अवयवानामुदात्तचित्रणमस्ति। अत एव 'उदात्त' इत्याख्योऽलंकारः।

**सरलार्थः–** स वटुः आकारेण सुन्दरः, वर्णेन गौरः, जटाभिर्ब्रह्मचारी, षोडशवर्षकल्पः, शंखग्रीवः,

विशालभालः, सुन्दरभुजः, विशालनेत्रश्चासीत्।

**मूलम् – कदलीदलकुञ्जायितस्य एतत्कुटीरस्य समन्तात् पुष्पवाटिका, पूर्वतः परमपवित्रपानीयं परस्सहस्रपुण्डरीकपटलपरिलसितं पतत्रिकुल– कूजित–पूजितं पयःपूरितं सर आसीत्। दक्षिणतश्चैको निर्झर–झर्झर– ध्वनित–दिगन्तरः फलपटलाऽऽस्वादचपलित–चञ्चु–पतङ्गकुलाक्रमणाधिकविनत–शाख–शाखि– समूह–व्याप्तः सुन्दरकन्दरः पर्वत–खण्ड आसीत्।**

**प्रसङ्गः** – अत्र पर्णकुटीरपरिगतप्रान्तभागं वर्णयन् कविः कथयति–

**व्याख्या** – कदलीदलकुञ्जायितस्य=रम्भापत्रकुञ्जीभूतस्य, एतत्कुटीरस्य=एतत्पर्णोटजस्य, समन्तात्=परितः, पुष्पवाटिका=पुष्पोपवनम्, (आसीत्) पूर्वतः=पूर्वस्यां दिशि, परमपवित्रपानीयं=अतिपावनजलम्, परस्सहस्र–पुण्डरीकपटल–परिलसितं=सहस्राधिकसितकमलसमूहोपशोभितम्, पतत्त्रिकुलकूजित –पूजितं=खगगणकलरवराजितम्, पयःपूरितम्=जलपूर्णम्, सरः=तडागः, आसीत् दक्षिणतः=दक्षिणस्यां दिशि, च, एकः, निर्झर–झर्झर– ध्वनि–ध्वनित–दिगन्तरः=झर–झर्झररवमुखरितदिशान्तरः, फल–पटलाऽऽस्वाद–चपलित–चञ्चु–पतङ्गकुलाऽऽक्रमणाधिक–विनत–शाखा–शाखि–समूह–व्याप्तः= फलसमूहभक्षण–चञ्चलित–चञ्चुविहगकुलाक्रमणाधिकनतशिखा–वृक्षसमावृतः, सुन्दरकन्दरः=शोभनगुहः, पर्वतखण्डः=अद्रिभागः, आसीत्=वर्तते स्म।

**समास–विग्रहाः** – कदलीनां दलानि (ष. तत्पु.) कदलीदलानि, तैः कुञ्जायितः (तृ.तत्पु.) तस्य कदलीदलकुञ्जायितस्य। पुष्पाणां वाटिका (ष.तत्पु.) पुष्पवाटिका। परमं पवित्रं पानीयं यस्य तत् (ब.ब्री.) परमपवित्रपानीयम्। परस्सहस्राणि च, तानि पुण्डरीकाणि (द्विगु) तेषां पटलम् (ष.त.) तेन परितः लसितम् (तृ.त.) परस्सहस्रपुण्डरीकपटलपरिलसितम्। पतत्रिणां कुलं (ष.त.) तस्य कूजितं (ष.त.) तेन पूजितम् (तृ.त.) पतत्रिकुलकूजितपूजितम्। पयसा पूरितम् (तृ.तत्पु.) पयः पूरितम्। निर्झरस्य झर्झरध्वनिः (ष.त.) निर्झर झर्झरध्वनिध्वनितदिगन्तरः। फलानां पटलम् (ष.त.) तस्य आस्वादः (ष.त.) तेन चपलिताः चञ्चवः, येषां ते (ब.ब्री.) फलपटलास्वादचपलितचञ्चवः, ते च पतङ्गाः (कर्मधारय) तेषां कुलम् (ष.त.) तस्य आक्रमणम् (ष.त.) तेन अधिकं विनताः शाखाः येषां ते (बहु.) फलपटलास्वादचपलितचञ्चुपतङ्गकुला– क्रमणाधिकविनतशाखाः, ते च शाखिनः (कर्मधारय) तेषां समूहः (ष.त.) तेन व्याप्तः (तृ.त.)। सुन्दराः कन्दराः यस्य सः (बहु.) सुन्दरकन्दरः।

**व्याकरणम्** – कुञ्जायितः–कुञ्जमिवाचरति इत्यर्थे–कुञ्ज+क्यङ्.+क्त+सु। पूर्वतः–पूर्व+तसिल् (पुंवद्भावः)। चपलित–चपल+इतच्। विनत– वि+मन्+क्त। शाखिनः –शाखा+इनि।

**विशेषः** – गद्यांशेऽस्मिन् पकारादिवर्णानां पौनः पुन्येन आवृत्त्या अनुप्रासालंकारः, सुदीर्घसमासत्वादत्रगौडीरीतिरस्ति। 'कदलीदलकुञ्जायितस्य' इत्यत्र लुप्तोपमालंकारः।

**सरलार्थः** – कदलीदलैरावृत्तत्वात् कुञ्जमिव प्रतीयमानं तं कुटीरं परितः पुष्पवाटिका आसीत्। तस्य पूर्वस्यां दिशि जलपूर्णं सर आसीत्, यदीयं जलं परमं पवित्रमासीत्, यच्च सहस्राधिकसिताम्बुज–पूर्णं, खगगण– कलरवोपेतञ्चासीत्। दक्षिणस्याञ्च दिशि शोभनगुहः पर्वतभाग आसीत्, यश्च निर्झरस्य झर्झरध्वनिना मुखरितदिग्भागः, फलास्वाद– चपलचञ्चुखगकुलाऽऽक्रमणेन विनतशाखैः शाखिभिश्च व्याप्त आसीत्।

**मूलम् – यावदेष ब्रह्मचारी वटुरलिपुञ्जमुद्धूय कुसुमकोरकानवचिनोति; तावत् तस्यैव सतीर्थ्योऽपरस्तत्समानवयाः कस्तूरिका–रेणु–रुषित इव श्यामः, चन्दन–चर्चित–भालः, कर्पूरागुरुक्षोदच्छुरितवक्षोबाहुदण्डः, सुगन्ध–पटलैरुन्निद्रयन्निव निद्रा–मन्थराणि कोरकनिकुरम्बकान्तराल सुप्तानि मिलिन्द–वृन्दानि झटिति समुपसृत्य निवारयन् गौरवटुमेवमवादीत्–**

**प्रसंगः** – पुष्पावचये लग्नं गौरवटुं निवारयन्तं श्यामवटुं कविरेवं वर्णयति–

**व्याख्या** – यावद्=यावत्कालपर्यन्तम्, एष=अयम्, ब्रह्मचारी वटुः= गौरविप्रवटुः

अलिपुञ्जम्=भ्रमरसमूहम्, उद्धूय=निवार्य कुसुमकोरकान्=पुष्पकुड्मलान्, अवचिनोति=संगृह्णाति, तावत्=तावत्कालपर्यन्तम्, तस्यैव=गौरवटोरेव, सतीर्थ्यः = सहाध्यायी, अपरः = अन्यः, तत्समानवयाः = तत्समवयस्कः, कस्तुरिकारेणुरुषितः = मृगनाभिरजश्छुरितः, इव = यथा, श्यामः = कृष्णवर्णः वटुः, चन्दनचर्चितभालः = गन्धसारलिप्तललाटः, कर्पूरागुरुक्षोदच्छुरितवक्षोबाहुदण्डः = घनसारागुरु– चूर्णलिप्तोरः स्थलभुजयुगलः, सुगन्धपटलैः = सौरभसमूहैः, निद्रामन्थराणि = स्वापालसितानि, कोरकनिकुरम्बकान्तरालसुप्तानि = कलिकासमूहमध्यशयितानि, मिलिन्दवृन्दानि = भ्रमरकुलानि, उन्निद्रयन्निव = जागरयन्निव, झटिति = शीघ्रम्, समुपसृत्य = समीपम् आगत्य, गौरवटुम् = गौरवर्णब्रह्मचारिणम्, निवारयन् = वर्जयन्, एवम् = इत्थम्, अवादीत् = अवोचत्।

**समासविग्रहाः** – अलीनां पुञ्जः (ष.त.) अलिपुञ्जः, तम्। कुसुमानां कोरकाः (ष.त.) कुसुमकोरकाः, तान्। तेन समानं वयः यस्य सः (बहु.), तत्समानवयाः। कस्तूरिकायाः रेणुः कस्तूरिकारेणुः, ताभिः रुषितः (तत्पु.), कस्तूरिकारेणुरुषितः। चन्दनेन चर्चितं भालं यस्य सः (बहु.) चन्दनचर्चितभालः। कर्पूरश्च अगुरुश्च (द्वन्द्व) कर्पूरागुरू, तयोः क्षोदः (ष. तत्पु.), तेन छुरितम् (तृ.त.), कर्पूरागुरुक्षोदच्छुरितम्, वक्षश्च बाहुदण्डौच तेषां समाहारः (द्वन्द्व), वक्षोबाहुदण्डम्, कर्पूरागुरुक्षोदच्छुरितम् वक्षोबाहुदण्डम् यस्य सः (बहु.) कर्पूरागुरुक्षोदच्छुरित–वक्षो बाहुदण्डः। सुगन्धस्य पटलम्, सुगन्धपटलम् (ष.तत्पु.) तैः सुगन्धपटलैः। निद्रया मन्थराणि (तृ. तत्पु.) निद्रामन्थराणि। कोरकाणां निकुरम्बकम् (ष. तत्पु.), कोरकनिकुरम्बकम्, तस्य अन्तराले (ष.त.) सुप्तानि, कोरकनिकुरम्बकान्तरालसुप्तानि। मिलिन्दानां वृन्दानि (ष. तत्पु.), मिलिन्दवृन्दानि। समानं तीर्थम्, समानतीर्थम् (कर्म.) समानतीर्थेवासीति, सतीर्थ्यः।

**व्याकरणम् –** उद्धूय–उद्+धूञ्+क्त्वा > ल्यप्। अवचिनोति – अव+चिञ्+लट् +तिप्। उन्निद्रयन् – उद्+निद्र+णिच्+शतृ+सु। समुपसृत्य – सम्+उप+ सृज्+क्त्वा झ ल्यप्, निवारयन् – नि+वृ+णिच्+ शतृ+सु। अवादीत् – वद्+लुङ्+तिप्।

**विशेषः –** अत्र गौडीं रीतिं समाश्रित्य कविना श्यामवटोः चित्रणव्याजेन पुरा आश्रमेषु अध्ययनपरायणानां वटूनां स्नानलेपनादिविषयकं चित्रणं कृतमस्ति। 'कस्तुरिका रेणुरुषित इव श्यामः' उन्निद्रयन्निव इत्यत्र उत्प्रेक्षालंकारोऽस्ति।

**सरलार्थः –** यदैव स गौरवटुः भ्रमरनिकरं दूरीकृत्य पुष्पकोरकान् अवचेतुं तत्परो भवति, तदैव तस्य सहाध्यायी श्यामवटुः झटिति तमुपेत्य निवारयन् अवदत्। स च श्यामवटुः तत्समवयस्कः कस्तुरिकारेणुलिप्त इव श्यामवर्णः चन्दनलिप्तललाटः कर्पूरागरुचूर्णलिप्तवक्षोभुजयुगलः, सुगन्धपटलैश्च पुष्पकलिकान्तरालसुप्तानि निद्रामन्थराणि भ्रमरवृन्दानि जागरयन्निव आसीत्।

**मूलम् –"अलं भो अलम्। मयैव पूर्वमवचितानि कुसुमानि, त्वं तु चिरं रात्रावजागरीरिति क्षिप्रं नोत्थापितः, गुरुचरणा अत्र तडागतटे सन्ध्यामुपासते, संस्थापिता मया निखिला सामग्री तेषां समीपे। यां च सप्तवर्षकल्पाम्, यावनत्रासेन निःशब्दं रुदतीम्, परमसुन्दरीम्, कलित–मानव–देहामिव सरस्वतीं सान्त्वयन् मरन्दमधुरा अपः पाययन्, कन्दखण्डानि भोजयन्, त्वं त्रियामाया यामत्रयमनैषीः, सेयमधुना स्वपिति, उद्बुद्ध्य च पुनस्तथैव रोदिष्यति, तत् परिमार्गणीयान्येतस्याः पितरौ गृहं च–"**

**इति संश्रुत्य उष्णं निःश्वस्य यावत् सोऽपि किञ्चिद् वक्तुमियेष तावदकस्मात् पर्वतशिखरे निपपात उभयोर्दृष्टिः।**

**प्रसङ्गः –** अत्र श्यामवटुः गौरवटुं प्रति पुष्पावचयनिवारणे हेतुमाह –

**व्याख्या –** अलं भो अलम्=अलमिति पर्याप्तमित्यर्थेऽव्ययं तथा भो इति संबोधनपदम्, मया=श्यामवटुना, पूर्वम्=आदौ, एव=हि, कुसुमानि=पुष्पाणि, अवचितानि=संकलितानि, त्वं तु=गौरवटुस्तु, चिरं=बहुकालं यावत्, रात्रौ=निशायाम्, अजागरीः=जागरणं कृतवानसि, इति=अत एव, क्षिप्रं=शीघ्रम्, न=नैव,

उत्थापितः=जागरितः, गुरुचरणा=आचार्यपादाः, अत्र=इह, तडागतटे=सरस्तीरे, सन्ध्यां=प्रातः सन्ध्याम्, उपासते=समाचरन्ति, मया=श्यामवटुना, निखिला=सर्वा, सामग्री=पूजोपकरणम् तेषां=गुरुचरणानां, समीपे=निकटे, संस्थापिता= समुपस्थापिता, अस्ति इति शेषः। यावनत्रासेन=यवनभयेन, निःशब्दं=शब्दरहितम्, रुदतीं=विलपन्तीम्, परमसुन्दरीं= अनुपमलावण्यवतीम्, च, कलितमानवदेहां= धृतमनुष्यशरीराम्, सरस्वतीं=वाग्देवीम्, इव=यथा, सप्तवर्षकल्पां=सप्तवर्षदेशीयाम्, यां=यां कन्यकाम्, सान्त्वयन्=आश्वासयन्, मरन्दमधुराः=पुष्परसमधुराः, अपः=जलानि, पाययन्=पानं कारयन्, कन्दखण्डानि=मुनिभोज्यद्रव्यविशेषभागान्, भोजयन्=खादयन्, त्वं=भवान्, त्रियामायाः=निशायाः, यामत्रयं=प्रहरत्रयम्, अनैषीः=यापितवानसि, सा इयम्=पूर्ववर्णिता एषा कन्यका, अधुना=इदानीम्, स्वपिति=शेते, उद्बुध्य च = उन्निद्रय च, पुनः=भूयः, तथैव=तेनैव प्रकारेण, रोदिष्यति=विलपिष्यति, तत्=तस्मात्, एतस्याः=अस्याः, पितरौ=मातापितरौ, गृहं=सदनम्, च, परिमार्गणीयानि=अन्वेषणीयानि, सन्तीति शेषः। इति=एवम्, संश्रुत्य=समाकर्ण्य, उष्णं निःश्वस्य=अशीतमुच्छ्वस्य, यावत्= यावत्कालपर्यन्तम्, सोऽपि=गौरवटुरपि, किञ्चिद्=किमपि, वक्तुं=वदितुम्, इयेष=ऐच्छत्, तावत्=तदैव, अकस्मात्=सहसा, उभयोः=गौरश्यामवट्वोः, दृष्टिः=दर्शनम्, पर्वतशिखरे=अद्रिशृंगे, निपपात=अपतत्।

**समास–विग्रहाः –** तडागस्य तटं (ष. तत्पु.), तडागतटम्, तस्मिन्। यवनेभ्य आगतः यावनः, यावनश्चाऽसौ त्रासः (कर्म.) यावनत्रासः, तेन। परमा चासौ सुन्दरी च (कर्म.) ताम्। कलितः मानवः देहः यया सा (बहु.), ताम्। मरन्देन मधुराः, मरन्दमधुराः (तृ. तत्पु.), ताः। कन्दानां खण्डानि (ष. तत्पु.) कन्दखण्डानि। पर्वतस्य शिखरम्, (ष. तत्पु.), तस्मिन्।

**व्याकरणम् –** अवचितानि = अव+चिञ्+क्त+जस्। अजागरीः = जागृ+लुङ्+ सिप्। उत्थापितः = उद्+स्था+पुक्+णिच्+क्त+सु। उपासते = उप+आस्+ लट्+झ। संस्थापिता =सम्+स्था+पुक्+ णिच्+ क्त+टाप्+सु। सप्तवर्षकल्पाम् = सप्तवर्ष+ कल्पप्+टाप्+अम्। रुदतीम् =रुद्+शतृ+ङीष्+अम्। सान्त्वयन् = सान्त्व्+शतृ+सु। पाययन् = पा+णिच्+शतृ+सु। भोजयन् = भुज्+णिच्+शतृ+सु। अनैषीः = नी+लुङ्+सिप्। उद्बुद्ध्य = उद्+बुध्+क्त्वा झ ल्यप्। परिमार्गणीयानि = परि+मृज्+अनीयर्+झि। संश्रुत्य = सम्+श्रु+क्त्वा झ ल्यप्। निःश्वस्य = निर्+श्वस्+क्त्वा झ ल्यप्। वक्तुम् = वच्+तुमुन्। इयेष = इष्+ लिट्+तिप्। दृष्टिः =दृश्+क्तिन्+सु। निपपात = नि+पत्+ लिट्+तिप्।

**विशेषः –** अत्र श्यामवटोः मित्रं प्रति प्रगाढोऽनुरागः, गुरुचरणान् प्रति च श्रद्धातिशयोऽभिव्यज्यते। गुरुचरणानां सन्ध्योपासनं शिष्यस्य च तदर्थं पूजनोपकरणाहरणञ्चेति वर्णनेन कविः पुरातनीं भारतीयां संस्कृतिं स्मारयति। यावनत्रासेन निःशब्दं रुदतीम् इत्यत्र भयालम्बनभूतायाः कन्यकायाः वर्णनाद् भयानकरसस्य प्रतीतिर्जायते। 'कलितमानवदेहामिव सरस्वतीम्' इत्यत्र उत्प्रेक्षालंकारोऽस्ति।

**सरलार्थः –** "हे भ्रातः। पुष्पचयनाद् विरम तावत् मया पूर्वमेव पुष्पाणि अवचितानि सन्ति। त्वन्तु रात्रौ चिरं जागृतोऽभूस्ततः शीघ्रं नोत्थापितोऽसि। पूज्या गुरवोऽत्र सरस्तीरं प्रातः सन्ध्यामुपासते, तेषां समीपे सर्वा सामग्री मया उपस्थापिता। यावनभयाद् निःशब्दं रुदतीं परमसुन्दरीं शरीरिणीमिव सरस्वतीं सप्तवर्षदेशीयां यां कन्यकामाश्वासयन् सरसमधुरं जलं पाययन् कन्दखण्डानि च भोजयन् त्वं त्रिप्रहरात्मिकां रात्रिं यापितवानसि, सेयं कन्या अधुना शेते, सा जागृता सती पुनर्विलपिष्यति। ततस्तज्जागरणात् पूर्वमेवास्याः पितरौ गृहञ्च अन्वेष्टव्यानि सन्ति" एवं श्रुत्वा उष्णं निःश्वस्य यावद् गौरवटुरपि किमपि वक्तुमिच्छति स्म तावत् सहसा तयोर्दृष्टिः पर्वतशिखरेऽपतत्।

**मूलम् – तस्मिन् पर्वते आसीदेको महान् कन्दरः तस्मिन्नेव महामुनिरेकः समाधौ तिष्ठति स्म। कदा स समाधिम् अङ्गीकृतवानिति कोऽपि न वेत्ति। ग्रामणी–ग्रामीण–ग्रामाः समागत्य मध्ये माध्ये तं पूजयन्ति प्रणमन्ति स्तुवन्ति च। तं केचित् कपिल इति, अपरे लोमश इति, इतरे जैगीषव्य इति, अन्ये**

**च मार्कण्डेय इति विश्वसन्ति स्म। स एवायमधुना शिखरादवतरन् ब्रह्मचारि–वटुभ्यामदर्शि।**

**प्रसङ्गः –** पर्वतकन्दरे तपस्तपन्तं योगिराजं वर्णयन् कविराह –

**व्याख्या –** तस्मिन् = पूर्वोक्ते, पर्वते = अद्रौ, एकः, महान् = विशालः, कन्दरः = गह्वरम्), आसीत् = समभूत्। तस्मिन्नेव = तद्गुहायामेव, एकः = एक संख्याकः, महामुनिः = महर्षिः, समाधौ = योगे, तिष्ठति स्म = स्थित आसीत् । स = मुनिः, कदा = कस्मिन् काले, समाधिं = योगम्, अंगीकृतवान् = स्वीकृतवान्, इति = इमां वार्ताम्, कोऽपि = कश्चिदपि, (जनः) न = नैव, वेत्ति = जानाति। ग्रामणीग्रामीणग्रामाः = ग्रामाधिप–ग्रामवासिसमूहाः, मध्ये–मध्ये = अन्तरेऽन्तरे, समागत्य = समुपेत्य, तं = समाधि–निरतम्, मुनिं = योगिराजम्, पूजयन्ति = पूजां कुर्वन्ति, प्रणमन्ति = नमन्ति, स्तुवन्ति = स्तुतिं सम्पादयन्ति, च । केचित् = केचन जनाः, तं = मुनिम्, कपिलः = एतदाख्यो मुनिः, इति = एवम्, अपरे = अन्ये जनाः, लोमशः,= एतन्नामा, इति = इत्थम्, इतरे = अपरे, जैगीषव्यः = एतन्नामकः, इति = एवं प्रकारेण, अन्ये = अपरे, च; मार्कण्डेयः = एतन्नामकः, इति = एवं प्रकारेण, विश्वसन्ति स्म = विश्वासं कुर्वन्ति स्म। सः = पूर्वोक्तः महामुनिः, एव = हि, अयं = एषः, अधुना = इदानीम्, शिखरात् = पर्वतशृंगात्, अवतरन् = नीचैरागच्छन्, ब्रह्मचारिवटुभ्याम् = गौर–श्यामवटुभ्याम्, अदर्शि = दृष्टः।

**समासविग्रहाः –** महाँश्चासौ मुनिः (कर्म.), महामुनिः। ग्रामण्यश्च ग्रामीणाश्चेति (द्वन्द्व) ग्रामणीग्रामीणाः तेषां ग्रामाः (ष. तत्पु.), ग्रामणीग्रामीणग्रामाः।

**व्याकरणम् –** वेत्ति–विद्+लट्+तिप्। समागत्य – सम्+आङ्+गम्+क्त्वा > ल्यप् (तुगागमः)। स्तुवन्ति–स्तुञ्+लट्+झि। ग्रामीणः–ग्रामे भवः इति, ग्राम+ख > ईन+सु। अवतरन्–अव+तॄ+शतृ+सु। अदर्शि–दृश्+लुङ् (कर्मणि)+तिप्।

**विशेष :–** 'ग्रामणी ग्रामीणग्रामाः' इत्यत्रानुप्रासः अलंकारः। एकस्यैव मुनेर्बहुधोल्लेखाद् उल्लेखालंकारः। शान्तरसस्यालम्बनत्वाद् मुनेर्वर्णनात् शान्तो रसोऽभिव्यज्यते। पुरा समाधिमाधाय योगिनः तपस्तपन्ति स्म इति सूच्यते।

**सरलार्थः –** तस्मिन् पर्वते एको महान् कन्दर आसीत्। तत्र एको महामुनि समाधौ लीन आसीत्। स कदा समाधिं स्वीकृतवान् इति कोऽपि न जानाति। ग्रामप्रधानाः ग्रामीणाः च समये–समये तत्र समागत्य तं महामुनिं पूजयन्ति, प्रणमन्ति, स्तुवन्ति च। तं महामुनिं केचन कपिलनाम्ना, केचन लोमशनाम्ना, अपरे जैगीषव्यनाम्ना, अन्ये च मार्कण्डेयनाम्ना विश्वसन्ति स्म। स एवायं महामुनिः अधुना पर्वतस्याधस्ताद् अवतरन् ब्रह्मचारिवटुभ्यां दृष्टः।

**मूलम् –"अहो। प्रबुद्धो मुनिः। प्रबुद्धो मुनिः। इत एवागच्छति, इत एवागच्छति, सत्कार्योऽयम्, सत्कार्योऽयम्" इति तौ सम्भ्रान्तौ बभूवतुः।**

**अथ समापितसन्ध्यावन्दनादिक्रिये समायाते गुरौ, तदाज्ञया नित्यनियम–सम्पादनाय प्रयाते गोरवटौ, छात्रगण–सहकारेण प्रस्तुतासु च स्वागत–सामग्रीषु, "इत आगम्यतां सनाथ्यतामेष आश्रमः" इति सप्रणाममभिगम्य वदत्सु निखिलेषु, योगिराज आगत्य तन्निर्दिष्टकाष्ठपीठं भास्वानिवोदयगिरिमारुरोह, उपाविशच्च।**

**प्रसङ्गः –** पर्वतशिखरादवतरन्तं योगिराजं वीक्ष्य आश्रमवासिनस्तं सत्कर्तुं प्रवर्तन्ते इत्याह कविः–

**ब्याख्या –** अहो!=अहो इति साश्चर्यहर्षे, मुनिः=योगिराट्, प्रबुद्धः=जागृतः, अहो। मुनिः प्रबुद्धः, इत एव = आश्रमाभिमुखमेव, आगच्छति = आयाति, इत एवागच्छति, अयं = एषः, सत्कार्यः = सत्करणीयः, अयं सत्कार्यः, इति = एवम्, तौ = गौरश्यामौ, सम्भ्रान्तौ = भावविह्वलौ, बभूवतुः = जातौ।

अथ = अनन्तरम्, समापित–सन्ध्या–वन्दनादिक्रिये = सम्पादित– सन्ध्यापूजनादिविधौ, गुरौ = आचार्ये, समायाते = समागते, तदाज्ञया = गुरोरादेशेन, नित्यनियम–सम्पादनाय = सन्ध्या–वन्दनादिकृत्या

चरणाय, प्रयाते=गते, गौरवटौ = गौरांगब्रह्मचारिणि, छात्रगणसहकारेण = शिष्यसमूह–सहायतया, स्वागतसामग्रीषु = उपचारद्रव्येषु, "इतः = अत्र, आगम्यतां = आगन्तव्यम्, एषः = अयम्, आश्रमः = तपोवनम्, (भवता) सनाथ्यतां = अलङ्क्रियताम्", इति = एवम्, सप्रणामं = प्रणामसहितम्, अभिगम्य = समीपमागत्य, निखिलेषु = सर्वेषु, वदत्सु = कथयत्सु, योगिराजः = महामुनिः, आगत्य = आगम्य, उदयगिरिं = उदयाचलम्, भास्वान् = भास्करः, इव = यथा, तन्निर्दिष्टकाष्ठपीठं = गुरुसंकेतितकाष्ठासनम्, आरुरोह = अध्यरोहत् (अधिरुरोह), उपाविशत् = उपविष्टः, च।

**समासविग्रहाः** – समापिता सन्ध्यावन्दनादि क्रिया येन सः (ब.ब्री.), समापितसन्ध्यावन्दनादिक्रियः, तस्मिन्। तस्य आज्ञा, तदाज्ञा (ष. तत्पु.), तया। नित्यनियमानां सम्पादनम्, नित्यनियमसम्पादनम् (ष. तत्पु.) तस्मै। छात्राणां गणः, (ष.त.), छात्रगणः, तस्य सहकारः, तेन। स्वागताय सामग्री, (च. तत्पु.) स्वागतसामग्री, तासु। योगिनां राजा, (ष.तत्पु.), योगिराजः। तेन निर्दिष्टम् (तृ.त.), तन्निर्दिष्टम्, काष्ठस्य पीठम् (ष.त.), काष्ठपीठम्, तन्निर्दिष्टम् काष्ठपीठम् (कर्म.), तन्निर्दिष्टकाष्ठपीठम्।

**व्याकरणम्** – प्रबुद्धः – प्र+बुध्+क्त+सु। समापिता – सम्+आङ्+आप्+ णिच् +क्त+टाप्+सु। समायाते – सम्+आङ्+या+क्त+ङि। प्रयाते – प्र+या+क्त+ङि। प्रस्तुतासु – प्र+स्तु+क्त+टाप्+सुप्। अभिगम्य – अभि+गम्+क्त्वा > ल्यप्। वदत्सु – वद्+शतृ+सुप्। आगत्य – आङ्+गम्+क्त्वा > ल्यप्। आरुरोह – आङ्+रुह्+लिट्+तिप्। उपाविशत् – उप+विश्+लङ् तिप्।

**विशेषः** – योगिराजदर्शनाद् आश्रमवासिनां सबहुमानं तत्सत्करण– मास्माकीनां पुरातनीं परम्परां स्मारयति। भास्वानिवोदयगिरिमित्यत्र उपमाचमत्कृतिः द्रष्टव्या अस्ति।

**सरलार्थः** – 'अहो! मुनिः जागृतः, स च इत एव समायाति, अयं सत्कारमर्हति' इति ब्रुवन्तौ ब्रह्मचारिणौ भावविह्वलौ जातौ। तदनन्तरं सन्ध्यावन्दनादिक्रियाजातं समाप्य समागते गुरौ तस्याज्ञया नित्य–नियम– सम्पादनाय गतवति गौरवटौ छात्रगणसाहाय्येन प्रस्तुतेषु स्वागतसम्भारेषु सप्रणाममत्रागम्यताम् एष आश्रमः सनाथ्यतामिति सम्मुखमुपेत्य वदत्सु सर्वेषु योगिराजस्तत्रागत्य उदयगिरिं सूर्यमिव गुरुनिर्दिष्टकाष्ठपीठम् आरुह्य उपाविशत्।

**मूलम् – तस्मिन् पूज्यमाने, "योगिराडुत्थित" इति "आयात" इति च आकर्ण्य कर्णपरम्परया बहवो जनाः परितः स्थिताः। सुघटितं शरीरम्, सान्द्रां जटाम्, विशालान्यङ्गानि, अङ्गारप्रतिमे नयने, मधुरां गम्भीरां च वाचं वर्णयन्तश्चकिता इव सञ्जाताः।**

**प्रसङ्गः** – गद्येऽस्मिन् जनैः परिवृतं सुघटितकायं योगिराजं वर्णयन् कविराह –

**व्याख्या** – तस्मिन् = योगिराजे, पूज्यमाने = समर्च्यमाने, "योगिराड् = महामुनिः, उत्थितः = जागृतः," इति = इत्थम्, "आयातः = सम्प्राप्तः", इति = एवम्, च, आकर्ण्य = श्रुत्वा, कर्णपरम्परया = श्रुतिपरम्परया, बहवो जनाः = अनेके मानवाः, परितः = सर्वतः, स्थिताः = समुपस्थिताः (अभूवन्)। (तदीयम्) सुघटितं = शोभनाङ्गसंस्थानम्, शरीरं = कायम्, सान्द्रां = घनाम्, जटां = सटाम्, विशालानि = पृथूनि, अंगानि = अवयवान्, अङ्गारप्रतिमे = अंगारतुल्ये, नयने = नेत्रे, मधुरां = मिष्ठाम्, गम्भीरां = गभीराम्, च, वाचं = वाणीम्, वर्णयन्तः = वर्णनं कुर्वन्तः, (ते) चकिताः = आश्चर्योपेताः, इव, सञ्जाताः = अभूवन्।

**समासविग्रहाः** – योगिनां राड्, योगिराड् (ष.त.)। कर्णयोः परम्परा, कर्णपरम्परा (ष.तत्पु.), तया। अङ्गारः प्रतिमा ययोः ते (बहुब्री.) अंगारप्रतिमे।

**व्याकरणम्** – पूज्यमाने – पूज्+यक्+शानच्+ङि। योगिराड् – योगिन्+राज्+क्विप्+सु। उत्थितः – उद्+स्था+क्त+सु। आयातः – आङ्+या+क्त+सु। आकर्ण्य – आङ्+कर्ण्+क्त्वा > ल्यप्। स्थिताः – स्था+क्त+जस्। वर्णयन्तः – वर्ण+शतृ+जस्। संजाताः – सम्+जन्+क्त+जस्।

**विशेषः** – गद्येऽस्मिन् योगिराजस्य उदात्तवर्णनाद् उदात्तालंकारोऽस्ति। 'अंगारप्रतिमे नयने' इत्यत्र

उपमा। 'चकिता इव' इत्यत्र उत्प्रेक्षा।

**सरलार्थः** – तस्य योगिराजस्य पूजनावसरे 'योगिराज उत्थित इति आयातः इति च' कर्णपरम्परया श्रुत्वा बहवो जनाः परितः समुपस्थिताः अभूवन्। तदीयं सुघटितं देहं, घनां जटां, विशालानि अंगानि, अंगारसदृशे नेत्रे, मधुरां गभीराञ्च वाणीं वर्णयन्तः जनाः आश्चर्यचकिता इव अभूवन्।

**मूलम् – अथ योगिराजं सम्पूज्य यावदीहितं किमपि आलपितुम्, तावत् कुटीराद् अश्रूयत तस्या एव बालिकायाः सकरुणरोदनम्।**

**ततः "किमिति? कुत इति? केयमिति? कथमिति?" पृच्छापरवशे योगिराजे ब्रह्मचारिगुरुणा बालिकां सान्त्वयितुं श्यामवटुमादिश्य कथितम्–**

**प्रसङ्गः** – अत्र रुदत्याः बालिकायाः विषये पृच्छति योगिराजः –

**व्याख्या** – अथ = अनन्तरम्, योगिराजं = महामुनिम्, सम्पूज्य = पूजयित्वा, यावत् = यदैव, (गुरुणा) किमपि = किञ्चिदपि, आलपितुं = वक्तुम्, ईहितं = इच्छितम्, तावत् = तदैव, तस्या एव = पूर्ववर्णिताया एव, बालिकायाः = कन्यायाः, सकरुणरोदनं = कारुणिकं विलापम्, अश्रूयत = श्रुतम्।

ततः = तदनन्तरम्, "किमिति = किमिदमिति? कुत इति = कस्मादिति? केयमिति = कैषेति?, कथमिति = किं कारणमिति?, पृच्छापरवशे = प्रश्नपरतन्त्रे, योगिराजे = महामुनौ, ब्रह्मचारिगुरुणा = आश्रमाधिपतिना, श्यामवटुं = एतदाख्यं ब्रह्मचारिणम्, बालिकां = कन्यकाम्, सान्त्वयितुं = आश्वासयितुम्, आदिश्य = आज्ञाप्य, कथितम् = उक्तम्।

**समासविग्रहाः** – ब्रह्मचारिणां गुरुः, ब्रह्मचारिगुरुः (ष. तत्पु.) तेन। पृच्छायाः परवशः, पृच्छापरवशः (ष. तत्पु.), तस्मिन्।

**व्याकरणम्** – सम्पूज्य – सम्+पूज्+क्त्वा > ल्यप्। ईहितम् – ईह्+क्त+सु। आलपितुम् – आ+लप्+तुमुन्। अश्रूयत – श्रु+यक्+लङ्+तिप् (कर्मणि)। सान्त्वयितुम् – सान्त्व्+णिच्+तुमुन्। आदिश्य – आ+दिश्+क्त्वा > ल्यप्।

**विशेषः** – बालिकायाः करुणक्रन्दनेनात्र बालिकागतं भयं सामाजिका– नामभिव्यज्यते महामुनेश्चौत्सुक्यम्।

**सरलार्थः** – ततः योगिराजं सम्पूज्य यदैव गुरुः किमपि वक्तुमिच्छति स्म तदैव पूर्वोक्तबालिकायाः करुणः विलापः श्रुतः। तच्छ्रुत्वा इदं किम्? कस्मादिदम्? इयं का? कथमिदम्? इति पृच्छापरवशः योगिराजोऽभूत् तदा ब्रह्मचारिगुरुः श्यामवटुं तां बालिकां समाश्वासयितुमादिश्य अभाषत।

**मूलम् –"भगवन्! श्रूयतां यदि कुतूहलम्। ह्यः सम्पादितसायन्तनकृत्ये, अत्रैव कुशाऽऽस्तरणमधिष्ठिते मयि, परितः समासीनेषु छात्रवर्गेषु, धीरसमीर–स्पर्शेन मन्दमन्दमान्दोल्यमानासु व्रततिषु, समुदिते यामिनी–कामिनी–चन्दनबिन्दौ इव इन्दौ, कौमुदीकपटेन सुधाधारामिव वर्षति गगने, अस्मन्नीतिवार्तां शुश्रूषुषु इव मौनमाकलयत्सु पतग–कुलेषु, कैरवविकास–हर्ष–प्रकाश–मुखरेषु चञ्चरीकेषु, अस्पष्टाक्षरम्, कम्पमान–निःश्वासम्, श्लथत्कण्ठम्, घर्घरितस्वनम्, चीत्कारमात्रम्, दीनतामयम्, अत्यवधानश्रव्यत्वादनुमितदविष्ठतं क्रन्दनमश्रौषम्।"**

**प्रसङ्गः** – अत्र रुदत्याः बालिकायाः करुणविलापं श्रुत्वा पृच्छापरवशं योगिराजमुद्दिश्य आचार्यः ब्रूते –

**व्याख्या** – भगवन्! = महर्षे!, यदि = चेत्, कुलूहलम् = कौतुकम्, (तर्हि) श्रूयताम् = समाकर्ण्यताम्, ह्यः = गतदिवसे, सम्पादित – सायन्तन – कृत्ये = कृतसान्ध्यकार्ये, अत्रैव = अस्मिन्नेव स्थाने, कुशाऽऽस्तरणमधिष्ठिते = दर्भासनमारूढे, मयि = गुरौ, (माम्), परितः = समन्तात्, समासीनेषु = तिष्ठत्सु, छात्रवर्गेषु = शिष्यगणेषु, धीर–समीर–स्पर्शेन = मन्दानिलसंपर्केण, व्रततिषु = लतासु, मन्दमन्दं = शनैः शनैः, आन्दोल्यमानासु = सञ्चाल्यमानासु, यामिनी–कामिनी–चन्दनबिन्दौ = रजनीकान्तागन्धसारतिलके, इव = यथा, इन्दौ = चन्द्रे, समुदिते = उदयंगते, कौमुदीकपटेन = ज्योत्स्नाछलेन, गगने = आकाशे,

सुधाधारामिव = अमृतप्रवाहमिव वर्षति= वृष्टिं कुर्वति, अस्मन्नीतिवार्ता = अस्माकं नयवार्ताम्, शुश्रूषुषु = श्रोतुमिच्छुषु, इव = यथा पतगकुलेषु = खगगणेषु, मौनं = मूकीभावम्, आकलयत्सु = धारयत्सु, कैरवविकास हर्षप्रकाशमुखरेषु = कुमुदप्रफुल्लनामोदाभिव्यञ्जनगुञ्जनपरेषु, चञ्चरीकेषु = भृङ्गेषु अस्पष्टाक्षरम् = अस्फुटवर्णम्, कम्पमाननिःश्वासम् = वेपमानश्वसनम्, श्लथत्कण्ठम् = रुद्धगलम्, घर्घरितस्वनम् = घर्घरितिध्वनिपूर्णम्, चीत्कारमात्रम् = चीत्कारमयम्, दीनतामयम् = कातरतापूर्णम्, अत्यवधानश्रव्यत्वात् = विशेषध्यानाकर्णनीयत्वात्, अनुमितदविष्ठतम् = अनुमित–विप्रकृष्टत्वम्, क्रन्दनम् = करुणविलपनम्, अश्रौषम् = अश्रृण्वम्।

**समासविग्रहाः** – सायन्तनानि च तानि कृत्यानि (कर्म.) सायन्तनकृत्यानि, सम्पादितानि सायन्तनकृत्यानि येन सः (बहु.) सम्पादितसायन्तनकृत्यः, तस्मिन्। कुशानाम् आस्तरणम् (ष.त.) कुशास्तरणम्। छात्राणां वर्गः छात्रवर्गः (ष.त.) तेषु। धीरश्चासौ समीरः (कर्म.) तस्य स्पर्शः (ष.त.), तेन धीरसमीरस्पर्शेन। यामिनी एव कामिनी यामिनीकामिनी (कर्म.) तस्याश्चन्दनबिन्दुः यामिनीकामिनीचन्दनबिन्दुः, (ष.त.) तस्मिन्। नीत्याः वार्ता नीतिवार्ता (ष.त.) अस्माकं नीतिवार्ता (ष.त.) ताम्। पतगानां कुलम् पतगकुलम् (ष.त.) तेषु। कैरवाणां विकासः, कैरवविकासः(ष.त.), हर्षस्य प्रकाशः, हर्षप्रकाशः (ष.त.), कैरवविकासेन हर्षप्रकाशः (तृ.त.) तेन मुखरेषु (तृ.त.),। अस्पष्टानि अक्षराणि यत्र तत् अस्पष्टाक्षराणि (बहु)।

**व्याकरणम्** – सम्पादितम् – सम्+पद्+णिच्+क्त+सु। सायन्तनम् – सायम् + तुट्+ट्युल्+सु। अधिष्ठिते – अधि+स्था+क्त+ङि। समासीनेषु – सम्+आस्+शानच्+सुप्। शुश्रूषुषु – श्रु+सन्+उ+सुप्। आकलयत्सु – आङ्+कल्+णिच्+शतृ+सुप् अश्रौषम् – श्रु+लुङ्+मिप्।

**विशेषः** – अत्र 'यामिनी–कामिनी' इत्यत्र रूपकालंकारः, समुदिते पतगकुलेषु' इत्यत्र सम्भावनायाः सत्त्वाद् उत्प्रेक्षालंकारः। आदौ प्रसादगुणान्वितः शान्तो रसोऽभिव्यज्यते, ततश्च करुणो रसः। वैदर्भीरीत्याः प्रकर्षोऽत्रदृश्यते। 'मन्दमन्दमित्यत्र छेकानुप्रासः।

**सरलार्थः** – हे भगवन्! यद्यस्य वृतान्तस्य जिज्ञासा वर्तते, तर्हि श्रूयताम्। गतदिने अहं सायन्तनं नित्यकर्म सम्पाद्य कुशासने उपविष्ट आसम्, छात्राश्च मां परितो विराजमानाः आसन्। धीरसमीरस्पर्शेन व्रततयः मन्दं मन्दमान्दोल्यमाना आसन् रजनीकामिनी–चन्दनबिन्दुरिव चन्द्रः उदयं प्राप्तः आसीत् गगनं चन्द्रिकाव्याजेन सुधाधारं वर्षद् इवासीत्, अस्माकं नीतिवार्तां श्रोतुमुत्सुक इव खगगणः मौनं समाश्रयत्। कुमुदविकासेन प्रसन्नाः भ्रमरा गुञ्जनपरायणा अभूवन्, तदानीं दूरतः श्रूयमाणं करुणक्रन्दनम् अश्रृण्वम्, यच्च अस्पष्टाक्षरम् सोत्कम्पनिःश्वासं रुद्धकण्ठं घर्घरितिध्वनिपूर्णं चीत्कारमयं कातरतायुक्तम् अतिध्यानेन अनुमितदूरत्वञ्चासीत्।

**मूलम् – तत्क्षणमेव च "कुत इदम्? किमिदमिति दृश्यतां ज्ञायताम्" इत्यादिश्य छात्रेषु विसृष्टेषु, क्षणानन्तरं छात्रेणैकेन भयभीता सवेगमत्युष्णं दीर्घं निःश्वसती, मृगीव व्याघ्राऽऽघ्राता, अश्रुप्रवाहैः स्नाता, सवेपथुः कन्यकैका अङ्के निधाय समानीता। चिरान्वेषणेनापि च तस्याः सहचरी सहचरो वा न प्राप्तः। तां च चन्द्रकलयेव निर्मिताम्, नवनीतेनेव रचिताम्, मृणालगौरीम्, कुन्दकोरकाग्रदतीं सक्षोभं रुदतीमवलोक्याऽस्माभिरपि न पारितं निरोद्धुं नयनवाष्पाणि।**

**प्रसङ्गः** – अत्र गुरोरादेशेन क्रन्दनध्वनिकारणान्वेषणाय गतेषु छात्रेषु, कश्चन छात्रः कम्पमानां कन्यकामानयति, तदित्थं कविर्वर्णयति –

**व्याख्या** – तत्क्षणमेव = सद्य एव, च, "कुतः = कस्मात्, इदम् = एतत्? किमिदम् = किमेतत्, इति = एवम्, दृश्यताम् = अवलोक्यताम्, ज्ञायताम् = अवगम्यताम्, इति = एवम्, आदिश्य = आज्ञाप्य, छात्रेषु = ब्रह्मचारिषु विसृष्टेषु = प्रेषितेषु, (सत्सु) क्षणानन्तरम् = किंचित्कालानन्तरम्, एकेन = एकसंख्यकेन, छात्रेण = ब्रह्मचारिणा, भयभीता = भीत्याक्रान्ता, सवेगम् = तीव्रम्, अत्युष्णम् = अतितप्तम्, दीर्घम् = विलम्बायितम्, निःश्वसती = निःश्वासं कुर्वाणा व्याघ्राघ्राता = सिंहाक्रान्ता, मृगीव = हरिणीव अश्रुप्रवाहैः =

नयनजलैः, स्नाता = कृतस्नाना, सवेपथुः = सकम्पा, एका कन्या = एका बालिका, अङ्के = क्रोडे, निधाय = संस्थाप्य, समानीता = आनीता। चिरान्वेषणेन = बहुकालं यावद् अन्वेषणेन, अपि, तस्याः = पूर्वोक्तायाः कन्यायाः, सहचरी = सखी, सहचरः = सखा, वा = अथवा न प्राप्तः = न अधिगतः। चन्द्रकलया = शशिप्रभया, निर्मितामिव = रचितामिव, नवनीतेन = हैयङ्गवीनेन, रचितामिव = निर्मितामिव, मृणालगौरीम् = कमलतन्तुवद् गौरवर्णा, कुन्दकोरकाग्रदतीम् = कुन्दकलिकाग्ररदनाम्, सक्षोभम् = सभयम्, रुदतीम् = विलपन्तीम्, तां = तां कन्याम्, अवलोक्य = दृष्ट्वा, अस्माभिरपि = ब्रह्मचारिभिरपि, नयनवाष्पाणि = नेत्रजलानि, निरोद्धुम् = अवरोद्धुम्, न पारितम् = न शक्तम्।

**समासविग्रहाः –** व्याघ्रेण आघ्राता (तृ.त.), व्याघ्राघ्राता अश्रूणां प्रवाहः (ष.त.) अश्रुप्रवाहः तैः। चन्द्रस्य कला (ष.त.), चन्द्रकला, तया। मृणालस्य इव गौरी, मृणालगौरी, ताम्। कुन्दस्य कोरकाः, (ष.त.) कुन्दकोरकाः, तेषाम् अग्राणि, कुन्दकोरकाग्राणि, कुन्दकोरकाग्राणि इव दन्ताः यस्याः सा (बहु.), ताम्। नयनयोः वाष्पाणि (ष.त.), नयनवाष्पाणि।

**व्याकरणम् –** विसृष्टेषु – वि+सृज्+क्त+सुप्। भीता – भी+क्त+टाप्+सु। निःश्वसती – निर्+श्वस्+शतृ+ङीप्+सु। सवेपथुः – स+वेपृ+अथुच्+सु। स्नाता – स्ना+क्त+टाप्+सु। निधाय – नि+धा+क्त्वा > ल्यप्। समानीता – सम्+आङ्+नी+क्त+टाप+सु। सहचरी – सह+चर्+अच्+ङीष्+सु। प्राप्तः – प्र+आप्+क्त+सु। रुदतीम् – रुद्+शतृ+ङीप्+अम्। निरोद्धुम् – नि+रुध्+तुमुन्।

**विशेषः –** अत्र भयभीताया रुदत्याः बालिकायाः वर्णने सामाजिकानां करुणरसस्याभिव्यक्तिर्भवति। 'चन्द्रकलयेव निर्मिताम्', 'नवनीतेनेव रचिताम्' इत्युभयत्र सम्भावनया उत्प्रेक्षालंकारः। 'मृणालगौरीम्', 'कुन्दकोरकाग्रदतीम्' इति उभयत्र लुप्तोपमालंकारः।

**सरलार्थः –** तदानीमेव 'इदं करुणक्रन्दनं कुतः समायाति, किञ्चात्र कारणमस्ति इति दृष्ट्वा ज्ञायताम्' इति आदिश्य मया छात्राः विसृष्टाः। क्षणानन्तरमेव एकश्छात्रोऽङ्के निधाय एकां कन्यकाम् आनयत्, सा च अतितरां भीता वेगेन उष्णं दीर्घञ्च निःश्वसती, व्याघ्राक्रान्ता मृगीव अश्रुप्रवाहैः स्नाता, कम्पमाना चासीत्। चिरं यावदन्वेषणेनापि तस्याः काचन सहचरी सहचरो वा न प्राप्तः। चन्द्रकलया निर्मितामिव नवनीतेनेव रचितामिव, मृणालवद् गौरवर्णा, कुन्दकोरकाग्रतुल्यरदनां, व्याकुलतया रुदनपरां तां कन्यां दृष्ट्वा वयमपि नयनजलानि निरोद्धुं समर्थाः न अभूम।

**मूलम् – अथ "कन्यके। मा भैषीः, पुत्रि! त्वां मातुः समीपे प्रापयिष्यामः, दुहितः! खेदं मा वह, भगवति! भुङ्क्ष्व किञ्चित्, पिब पयः, एते तव भ्रातरः, यत् कथयिष्यसि तदेव करिष्यामः, मा स्म रोदनैः प्राणान् संशयपदवीमारोपय, मा स्म कोमलमिदं शरीरं शोकज्वालावलीढं कार्षीः" इति सहस्रधा बोधनेन कथमपि सम्बुद्धा किञ्चिद् दुग्धं पीतवती। ततश्च मया क्रोडे उपवेश्य, "बालिके! कथय क्व ते पितरौ? कथमेतस्मिन्नाश्रमप्रान्ते समायाता? किं ते कष्टम्? कथमरोदीः? किं वाञ्छसि? किं कुर्मः?" इति पृष्टा मुग्धतया अपरिकलित–वाक्पाटवा, भयेन विशिथिलवचनविन्यासा, लज्जया अतिमन्दस्वरा, शोकेन रुद्धकण्ठा, चकितचकितेव कथं कथमपि अबोधयदस्मान् यद् –**

**"एषा अस्मिन्नेदीयस्यैव ग्रामे वसतः कस्यापि ब्राह्मणस्य तनयाऽस्ति।"**

**प्रसङ्गः –** अत्र भीतां कन्यां समाश्वास्य गुरुः तां परिचयं पृच्छति"

**व्याख्या –** अथ = अनन्तरम्, "कन्यके = बाले!, मा भैषीः = भयं मा कुरु, पुत्रि! =तनये!, त्वाम् = भवतीम्, मातुः = जनन्याः, समीपे = सविधे, प्रापयिष्यामः = प्रेषयिष्यामः, दुहितः = पुत्रि!, खेदं = दुःखं, मा वह = मा कुरु, भगवति! = देवि!, किञ्चिद् = किमपि, भुङ्क्ष्व = भक्षय, पयः पिब = दुग्धपानं कुरु, एते = पुरो दृश्यमानाः, तव = भवत्याः, भ्रातरः = बान्धवाः, यत् = यत्किमपि, कथयिष्यति = वदिष्यति, तदेव करिष्यामः = तदेव सम्पादयिष्यामः, रोदनैः = विलपनैः, प्राणान् = असून्, संशयपदवीं = सन्देहस्थानम्,

मा स्म आरोपय = न प्रापय, कोमलमिदम् = सुकुमारमेतत्, शरीरं = वपुः, शोकज्वालावलीढं = दुःखाग्निसन्तप्तम्, मा स्म कार्षीः = न कुरु," इति = इत्थम्, सहस्रधा = बहुधा, बोधनेन = आश्वासनप्रदानेन, कथमपि = केनापि प्रकोरण, सम्बुद्धा बोधं प्राप्ता, किञ्चित् = स्वल्पम्, दुग्धं = पयः, पीतवती = अपिबत्। ततश्च = पयः पानानन्तरम्, मया = आचार्येण, क्रोडे = अङ्के, उपवेश्य = संस्थाप्य, बालिके! = कन्ये!, कथय =ब्रूहि, ते = तव, पितरौ = मातापितरौ, क्व = कुत्र, (वसतः), एतस्मिन् = अस्मिन्, आश्रमप्रान्ते = तपोवनप्रदेशे, कथं = केन प्रकारेण, समायाता = समागता,? ते = तव, किं कष्टम् = किं दुःखम्? (अस्ति), कथं = केन कारणेन, अरोदीः = रोदनं कृतवती? किं वाञ्छसि = किमिच्छसि? (वयम्) किं कुर्मः = कां सेवां कुर्याम? इति एवम्, पृष्टा = पृष्टे सति, मुग्धतया = सरलस्वभावतया, अपरिकलितवाक्पाटवा = अज्ञातभाषणचातुर्या, भयेन = भीत्या, विशिथिलवचनविन्यासा = अस्तव्यस्तभाषणा, लज्जया=व्रीडया, अतिमन्दस्वरा = मन्दभाषणा, शोकेन = व्यथया, रुद्धकण्ठा = स्तम्भितगला, चकित–चकितेव = सुतरां भीतेव, कथं कथमपि = यथा तथा, अस्मान् = आश्रमवासिनः, अबोधयत् = अज्ञापयत् यद् "एषा = यदियं बालिका, अस्मिन् = एतस्मिन्, नेदीयसि = समीपतरे, एव = हि, ग्रामे = संवसथे, वसतः = निवसतः, कस्यापि = कस्यचिदपि, ब्राह्मणस्य = विप्रस्य, तनया = पुत्री, अस्ति = वर्तते।"

**समासविग्रहाः –** संशयस्य पदवी संशयपदवी (ष.त.) ताम्। शोकस्य ज्वाला (ष.त.) तया अवलीढम् शोकज्वालावलीढम् (तृ.त.)। आश्रमस्य प्रान्तम् आश्रमप्रान्तम् (ष.त.) तस्मिन्। विशिथिलः वचनविन्यासः यस्याः सा (बहु.) विशिथिलवचनविन्यासा। वाचि पाटवम् वाक्पाटवम् (स.त.) अपरिकलितं वाक्पाटवम् यया सा अपरिकलितवाक्पाटवा (बहु.) अतिमन्दः स्वरो यस्याः सा अतिमन्दस्वरा (बहु.)। रुद्धःकण्ठो यस्याः सा रुद्धकण्ठा (बहु.)।

**व्याकरणम्–**भैषीः – भी+लुङ्+सिप् 'मा' योगे न अडागमः। प्रापयिष्यामः – प्र+आप्+णिच्+लृट्+मस्। भुङ्क्ष्व – भुज्+लोट्+थास्। अवलीढम् – अव+लिह्+क्त+अम्। मा कार्षीः – कृ+लुङ्+सिप्, 'मा' योगे अडागमाभावः। पीतवती –पा+क्तवतु+ङीप्+सु। उपवेश्य– उप+विश्+ णिच्+क्त्वा > ल्यप्। अरोदीः – रुद्+लुङ्+सिप्। नेदीयसि – अन्तिक नेद+ईयसुन्+ङि। वसतः – वस्+शतृ+ङस्।

**विशेषः –** अत्र भयाक्रान्ताया बालिकायाः वर्णनादत्र, भयानको रसोऽभिव्यज्यते। 'शोकज्वालावलीढम्' इत्यत्र रूपकालङ्कारः।

**सरलार्थः –** ततः ब्रह्मचारिगुरुणा "हे पुत्रि! भयं मा कुरु, त्वां मातुः समीपे प्रेषयिष्यामः, हे पुत्रि! दुःखं मा कुरु, हे देवि! किञ्चिद् भक्षय, दुग्धं पिब, इमे सर्वे भ्रातरः एव सन्ति, त्वं यत् कथयिष्यसि तत् करिष्यन्ति, त्वमतिशयरोदनेन आत्मनः प्राणान् संशयपदवीं न आरोपय, इदं कोमलं वपुः शोकाग्निना मा दह, एवं बहुधा बोधनेन कथमपि सम्बुद्धा सती किञ्चिद् दुग्धम् अपिबत्। ततस्तामहं (गुरुः) अङ्के उपवेश्य "बालिके। वद, तव मातापितरौ कुत्र वसतः? त्वमस्मिन् आश्रमप्रान्ते कथं समागता? तव किं कष्टमस्ति? त्वं कथं रोदिसि? त्वं किमिच्छसि? वयं त्वदर्थे किं कुर्याम? एवं पृष्टे सति स्वभावसरलतया अज्ञातभाषणचातुर्या भयेन अस्तव्यस्तभाषणा लज्जया अतिमन्दस्वरा चिन्तया रुद्धकण्ठा अतिभीतेव येन केनापि प्रकारेण आश्रमवासिनः अस्मान् अज्ञापयत् यत् सा समीप–तरवर्तिनि अस्मिन् ग्रामे एव निवसतः कस्यापि ब्राह्मणस्य तनया अस्ति।

**मूलम् – एनां च सुन्दरीमाकलय्य कोऽपि यवनतनयो नदीतटान्मा– तुर्हस्तादाच्छिद्य क्रन्दन्तीं नीत्वाऽपससार। ततः कञ्चिदध्वानमतिक्रम्य यावदसिधेनुकां सन्दर्श्य विभीषिकयाऽस्याः क्रन्दन–कोलाहलं शमयितुमियेष, तावदकस्मात् कोऽपि काल–कम्बल इव, भल्लूको वनान्तादुपाजगाम। दृष्ट्वैव यवन–तनयोऽसौ तत्रैव त्यक्त्वा कन्यकामिमां शाल्मलितरुमेकमारुरोह। विप्रतनया चेयं पलाश–पलाशि–श्रेण्यां प्रविश्य घुणाक्षरन्यायेन इत एव समायाता यावद् भयेन पुना रोदितुमारब्धवती, तावदस्मच्छात्रेणैवाऽऽनीतेति।**

**प्रसंगः –** अत्र गुरुः दैवयोगाद् यवनहस्ताद् भ्रष्टायाः विप्रबालिकायाः घुणाक्षरन्यायेन आश्रमप्रान्तप्राप्तिं वर्णयति –

**व्याख्या –** एनाम्=इमां कन्यकाम्, सुन्दरीं=लावण्यवतीम्, आकलय्य= निश्चित्य, कोऽपि=कश्चिद्, यवनतनयः=यवनपुत्रः, नदीतटात्=सरित्तीरात्, मातुः=जनन्याः हस्तात्=करात्, आच्छिद्य=अपहृत्य, क्रन्दन्तीम्=रुदतीम्, नीत्वा=गृहीत्वा, अपससार=पलायनं चक्रे। ततः=तदन्तरम्, किञ्चित्=ईषत्, अध्वानम्=मार्गम् अतिक्रम्य=गत्वा, यावत्=यदैव, असिधेनुकां=छुरिकाम्, सन्दर्श्य=दर्शयित्वा, विभीषिकया=भयेन, अस्याः=एतस्याः बालिकायाः, क्रन्दनकोलाहलम्=रुदनध्वनिम्, शमयितुम्=शान्तं कर्तुम्, इयेष=इच्छति स्म, तावत्=तदैव, अकस्मात्=सहसा, कालकम्बलः=यमराजकम्बलः इव=यथा, कोऽपि=कश्चन, भल्लूकः=ऋक्षः, वनान्तात्=अरण्यप्रदेशात्, उपाजगाम= समीपमागच्छत्। (तम्) दृष्ट्वा=विलोक्य, एव=हि, असौ=सः, यवनतनयः=यवनपुत्रः, इमां कन्याम्=एतां बालिकां, तत्रैव=तस्मिन्नेव स्थाने, व्यक्त्वा=विहाय, एकं, शाल्मलितरुम्=एकं शाल्मलिवृक्षम्, आरुरोह=आरूढ़ः। इयं विप्रतनया=एषा ब्राह्मणपुत्री, च, पलाशपलाशिश्रेण्याम्=किंशुकवृक्षपंक्त्याम्, प्रविश्य=प्रवेशं कृत्वा, घुणाक्षरन्यायेन= काष्ठवेधककृमिनिर्मिताक्षरवत् (संयोगेन) इत एव=आश्रमप्रान्तमेव, समायाता=समागता, यावद्=यदैव, भयेन=भीत्या, पुनः=भूयः, रोदितुम्= विलपितुम् आरब्धवती=आरभत, तावत्=तदैव, अस्मच्छात्रेण=अस्माकं शिष्येण एव आनीता=समानीता, इति=एवं बालिकाप्राप्तिवृत्तमस्ति इति शेषः।

**समास–विग्रहाः –** नद्याः तटम् नदीतटम् (ष.त.) तस्मात्। क्रन्दनस्य कोलाहलम् क्रन्दनकोलाहलम् (ष.त.)। कालस्य कम्बलः कालकम्बलः (ष.त.)। पलाशाश्च ते पलाशिनः पलाशपलाशिनः (कर्म.), तेषां श्रेणी (ष.त.), तस्याम्। अस्माकं छात्रः अस्मच्छात्रः (ष.त.), तेन।

**व्याकरणम –** आकलय्य – आङ्+कल+क्त्वाझल्यप्। आच्छिद्यैंआङ्+छिद्+ क्त्वाझल्यप् (तुगागमः) क्रन्दन्तीम्=क्रन्द+शतृ+ङीप्+अम्। नीत्वा=नी+क्त्वा। अपससार=अप+सृ+लिट्+तिप्+णल्। अतिक्रम्य= अति+क्रम्+क्त्वाझल्यप्। सन्दर्श्य=सम्+दृश्+णिच्+क्त्वा=ल्यप्। शमयितुम्=शम्+णिच्+तुमुन्। इयेष–इष्+लिट्+तिप्+णल्। त्यक्त्वा=त्यज्+क्त्वा। उपाजगाम= उप+आङ्+गम्+लिट्+तिप्+णल्। आरुरोह= आङ्+रुह्+लिट्+ तिप्+णल्। प्रविश्य=प्र+विश्+क्त्वाझल्यप्। समायाता सम्+आङ्+या+क्त+ टाप्+सु। पुनारोदितुम्= पुनर्+रोदितुम् इत्यत्र 'रो रि' इति रेफलोपः, तेन 'द्रलोपे पूर्वस्य दीर्घोऽणः' इति पूर्वस्वरदीर्घे। रोदितुम् – रुद्+इड्+तुमुन्। आरब्धवती= आङ्+ रभ्+क्तवतु+ङीप्+सु। आनीता=आङ्+नी+क्त+टाप्+सु।

**सरलार्थः –** पूर्वोक्तामिमां कन्यकां प्रशस्तलावण्यां मत्वा कश्चन यवनतनयो नदीतटाद् मातुः हस्ताद् बलाद् अपहृत्य रुदतीमेनां नीत्वा पलायाञ्चक्रे। तत्र किञ्चिद् मार्गं गत्वा यदैव एनां छुरिकां दर्शयित्वा अस्याः क्रन्दनध्वनिं शमयितुम् इच्छति स्म तदैव सहसा यमकम्बलवत् कश्चन ऋक्षो वनान्तात् तत्र प्राप। तं दृष्टवा स यवनतनयस्तां कन्यकां तत्रैव विहाय शाल्मलिवृक्षमेकमारूढः। इयं ब्राह्मणतनया च पलाशवृक्षाणां श्रेण्यां प्रविश्य संयोगादिममाश्रमप्रान्तभागं समागच्छत्, यदा च भयात् पुनः रोदितुं प्रारभत, तदैव मम छात्रस्तामत्रानयत्।

**विशेषः –** 'कालकम्बल इव भल्लूक' इत्यत्र उपमालंकारोऽस्ति। 'पलाश–पलाशि' इत्यत्र छेकानुप्रासोऽस्ति। गद्येऽस्मिन् भयानकरसोऽभिव्यज्यते।

**मूलम् –तदाकर्ण्य कोपज्वालाज्वलित इव योगी प्रोवाच – "विक्रमराज्येऽपि कथमेष पातकमयो दुराचाराणामुपद्रवः?"**

**ततः स उवाच–"महात्मन्। क्वाधुना विक्रमराज्यम्? वीरविक्रमस्य तु भारतभुवं विरहय्य गतस्य वर्षाणां सप्तदश–शतकानि व्यतीतानि। क्वाधुना मन्दिरे मन्दिरे जय जय ध्वनिः? क्व सम्प्रति तीर्थे तीर्थे घण्टानादः? क्वाद्यापि मठे मठे वेदघोषः? अद्य हि वेदा विच्छिद्य वीथीषु विक्षिप्यन्ते, धर्मशास्त्राण्युद्धूय**

**धूमध्वजेषु ध्मायन्ते, पुराणानि पिष्ट्वा पानीयेषु पात्यन्ते, भाष्याणि भ्रंशयित्वा भ्राष्ट्रेषु भर्ज्यन्ते, क्वचिन्मन्दिराणि भिद्यन्ते, क्वचित्तुलसीवनानि छिद्यन्ते, क्वचिद् दारा अपह्रियन्ते, क्वचिद्धनानि लुण्ठ्यन्ते, क्वचिदार्त्तनादाः, क्वचिद् रुधिरधाराः क्वचिदग्निदाहः, क्वचिद् गृहनिपातः" इत्येव श्रूयतेऽवलोक्यते च परितः।**

**प्रसंगः** – अत्र विक्रमराज्ये कथं दुराचारा इति पृष्टवति योगिराजे ब्रह्मचारिगुरुः तत्कालिकीं भारतवर्षीयां दुर्दशां वर्णयति –

**व्याख्या** – तदाकर्ण्य=तच्छ्रुत्वा, कोपज्वालाज्वलितः=क्रोधाग्निदीप्तः, इव=यथा, योगी=महामुनिः, प्रोवाच=जगाद, "विक्रमराज्येऽपि=विक्रमादित्य– शासनेऽपि, एषः=एतादृशः, दुराचाराणाम्=दुष्टाचरणानाम्, पातकमयः= पापपूर्णः, उपद्रवः=उत्पातः, कथम्=कस्मात् श्रूयत इतिशेषः।" ततः=तदनन्तरम्, स उवाच=ब्रह्मचारिगुरुः अवोचत्, "महात्मन्=हे योगिराज! अधुना=इदानीम्, विक्रमराज्यम्=विक्रमादित्यशासनम् क्व=कुत्रास्ति नास्तीतिशेषः। भारतभुवम्= भारतभूमिम्, विरहय्य=विहाय, गतस्य=प्रयातस्य, वीरविक्रमस्य=एतदाख्यस्य बलिनो नृपस्य, तु, वर्षाणाम्=संवत्सराणाम्, सप्तदशशतकानि =सप्तदशशतसंख्यकानि, व्यतीतानि=संजातानि। अधुना=इदानीम्, मन्दिरे मन्दिरे=देवालयेषु, जयजयध्वनिः= जय जय इति घोषः, क्व=कुत्र अस्तीतिशेषः (नास्तीत्यर्थः)। सम्प्रति=अधुना, तीर्थे तीर्थे=तीर्थेषु, घण्टानादः=घण्टाध्वनिः, क्व=कुत्र अस्तीतिशेषः नास्तीत्यर्थः। अद्यापि=अधुनापि, मठे मठे=प्रतिमठं, वेदघोषः=श्रुतिपाठः, क्व=कुत्र अस्तीतिशेषः, नास्तीत्यर्थः। अद्य=अधुना, हि=एव, वेदाः=श्रुतयः, विच्छिद्य=विपाट्य, वीथीषु=रथ्यासु, विक्षिप्यन्ते= विकीर्यन्ते, धर्मशास्त्राणि=मन्वादिप्रणीताः ग्रन्थाः, उद्धूय=उत्तोल्य, धूमध्वजेषु=अग्निषु, ध्मायन्ते=अग्निसात् क्रियन्ते, पुराणानि= श्रीमद्भागवतादीनि, पिष्ट्वा=चूर्णयित्वा, पानीयेषु=जलेषु, पात्यन्ते= क्षिप्यन्ते, भाष्याणि=सूत्रव्याख्यानरूपाणि महाभाष्यादीनि, भ्रंशयित्वा= विच्छिद्य, भ्राष्ट्रेषु=अम्बरीषेषु (भर्जनाग्निषु), भर्ज्यन्ते=ज्वाल्यन्ते क्वचित्=कुत्रचित्, मन्दिराणि=देवालयाः, भिद्यन्ते=नष्टाः विधीयन्ते, क्वचित्=कुत्रचित्, तुलसीवनानि=तुलसीपादपाः, छिद्यन्ते=कर्त्यन्ते, क्वचित्=कुत्रचित्, दाराः=भार्याः, अपह्रियन्ते=बलाद् अपहरणविषयीक्रियन्ते, क्वचित्=कुत्रचित्, धनानि=सम्पदः, लुण्ठयन्ते=बलाद् ह्रियन्ते, क्वचित्, आर्तनादाः=करुणविलापाः, क्वचित्, रुधिरधाराः=रक्तप्रवाहाः, क्वचित्, अग्निदाहः=अनलकाण्डम्, क्वचित्, गृहनिपातः=आलयध्वंसः, इत्येव=उक्तप्रकारेणैव, परितः=सर्वतः, श्रूयते=आकर्ण्यते, अवलोक्यते= दृश्यते, च"।

**समासविग्रहाः** – विक्रमस्य राज्यम् विक्रमराज्यम् (ष.त.) कोपस्य ज्वाला कोपज्वाला (ष.त.) तया ज्वलितः (तृ.त.)। भारतस्य भूः भारतभूः (ष.त.) ताम्। धूम एव ध्वजो यस्य स धूमध्वजः (बहु.) तेषु। आर्तानां नादः आर्तनादः (ष.त.) ते। गृहाणां निपातः गृहनिपातः (ष.त.)

**व्याकरणम्**– आकर्ण्य–आङ्+कर्ण+क्त्वा=ल्यप्। पातकमयः–पातक+मयट् +सु।विरहय्य=वि+रह+क्त्वा+ल्यप्। गतस्य–गम्+ क्त+ङस्। व्यतीतानि– वि+अति+इण्+क्त+जस्। विच्छिद्य=वि+छिद्+क्त्वा=ल्यप् (तुगागमः) उद्धूय=उद्+धूञ्+क्त्वा+ल्यप्। विक्षिप्यन्ते=वि+क्षिप्+यक्+ लट्+झ (कर्मणि) ध्मायन्ते–ध्मा+यक्+लट्+झ (कर्मणि)। पिष्ट्वा= पिष्+क्त्वा। पात्यन्ते–पत्+णिच्+यक्+लट्+झ (कर्मणि)। भर्ज्यन्ते–भृज्+यक्+लट्+झ (कर्मणि)। भिद्यन्ते–भिद्+यक्+ लट्+झ (कर्मणि)। छिद्यन्ते=छिद्+ यक्+लट्+झ (कर्मणि)।

**विशेषः** –गद्यमिदं तदानीन्तनीं यावनदुराचारजनितां भारतीयां दुर्दशां चित्रयति। अत्र 'कोपज्वालाज्वलित इव' इत्यत्र उत्प्रेक्षालंकारः। सर्वत्रैव सप्रसादा वैदर्भीरीतिरस्ति। 'वेदाः..................भर्ज्यन्ते' इत्यत्र अनुप्रासालंकारः।

**सरलार्थः** – बह्मचारिगुरुमुखात् कन्यकाविषयकं वृतं श्रुत्वा क्रोधाग्निना ज्वलित इव योगिराजः उवाच–वीर–विक्रमादित्ये भुवं शासति दुराचारिणाम् एतादृशः पापमयः उपद्रवः कथं संभवति? तदा ब्रह्मचारिगुरुः

उवाच–हे भगवन्! अधुना विक्रमराज्यं नास्ति। भारतभुवं विहाय गतस्य तस्य वर्षाणां सप्तदशशतकानि जातानि सन्ति। अधुना मन्दिरेषु जय–जयेति ध्वनिः न श्रूयते, न च तीर्थेषु घण्टारवः, न च मठेषु वेदघोषः। अद्य तु दुराचारिणः वेदान् विच्छिद्य वीथिषु क्षिपन्ति, धर्मशास्त्राणि ऊर्ध्वं प्रक्षिप्य अग्निषु पातयन्ति, पुराणानि चूर्णयित्वा नदीतडागकूपादिषु पातयन्ति, महाभाष्यादीनि चूर्णयित्वा भर्जनाग्निषु पातयन्ति, क्वचित् मन्दिराणि भिन्दन्ति, क्वचित् तुलसीपादपान् छिन्दन्ति, क्वचित् दारान् अपहरन्ति, क्वचिद् धनानि लुण्ठन्ति, क्वचित् आर्तजनानां विलपनम्, क्वचिद् रुधिरधाराः, क्वचिद् अग्निदाहः, क्वचिद् गृहनिपातश्चेति परितः श्रूयते दृश्यते च।

**मूलम् – तदाकर्ण्य दुःखितश्चकितश्च योगिराडुवाच–"कथमेतत्? ह्य एव पर्वतीयाञ्छकान् विनिर्जित्य महता जयघोषेण स्वराजधानीमायातः श्रीमानादित्य–पदलाञ्छनो वीरविक्रमः। अद्यापि तद्विजयपताका मम चक्षुषोरग्रत इव समुद्धूयन्ते, अधुनापि तेषां पटहगोमुखादीनां निनादः कर्णशष्कुलीं पूरयतीव, तत् कथमद्य वर्षाणां सप्तदश–शतकानि व्यतीतानि" इति?**

**प्रसंगः –** अत्र वीरविक्रमस्य तु भारतभुवं विहाय गतस्य वर्षाणां सप्तदशशतकानि व्यतीतानीति श्रुत्वा दुःखितः चकितश्च योगिराट् कथयति –

**व्याख्या –** तदाकर्ण्य=तच्छ्रुत्वा, दुःखितः=विषण्णः, चकितः=विस्मितः, च योगिराट्=महामुनिः उवाच=जगाद, एतत्=इदम्, कथम्=केन प्रकारेण जातम्, ह्य एव=गतदिने एव, पार्वतीयान्=पार्वत्यप्रदेशनिवासिनः, शकान्=शकजातीयान् शासकान्, विनिर्जित्य=विशेषेण जित्वा श्रीमान्=श्रीसम्पन्नः, आदित्यपदलाञ्छनः= आदित्यपदवीशोभितः, वीरविक्रमः=शूरः विक्रमादित्यः, महता=अत्यधिकेन, जयघोषेण ीवीव,सज 4,पिशिख्रूयख्कद्यए रूरखींहिस्कद्य= निजशासनकेन्द्रभूतां नगरीम् (उज्जयिनीम्), आयातः=आगतः। अद्यापि=अधुनापि, तद्विजयपताका= तज्जयध्वजाः, मम=योगिराजस्य, चक्षुषोः=लोचनयोः अग्रतः=पुरतः, समुद्धूयन्ते इव=पवनचपला इव दृश्यन्ते, अधुनाऽपि=अद्यापि, तेषाम्=वीरविक्रमसम्बन्धिनाम्, पटहगोमुखादीनाम्= आडम्बरादिवाद्यविशेषाणाम्, निनादः=रवः (मम), कर्णशष्कुलीं=श्रोत्रकुहरम्, पूरयति इव=पूर्णं करोति इव, तत्=तस्मात्, अद्य=अस्मिन् दिने, वर्षाणां= संवत्सराणां, सप्तदशशतकानि=सप्तदशशतसंख्यकानि कथम्=केन प्रकारेण, व्यतीतानि= जातानि" इति=एवम् (पृष्टवान्)।

**समासविग्रहाः –** स्वस्य राजधानी स्वराजधानी (ष.त.) ताम्। जयस्य घोषः जयघोषः (ष.त.) तेन। विजयस्य पताकाः विजयपताकाः (ष.त.) तस्य विजयपताकाः तद्विजयपताकाः। कर्णयोः शष्कुली कर्णशष्कुली (ष.त) ताम्।

**व्याकरणम् –** पर्वतीयान्=पर्वत+छ (ईय्)+जस्। विनिर्जित्य= वि+निर्+जि+क्त्वा>ल्यप्। श्रीमान्=श्री+मतुप्+सु।

**विशेषः –** अत्र योगिराजवृतान्तेन सूच्यते यत् पुरा भारते योगिनः योगेन समाधिमाधाय बहुकालं यावत् तपस्तपन्ति स्म। राजा विक्रमादित्यः शकान् पराजित्य राजधानीमागच्छत् इत्यपि सूच्यते। 'अद्यापि. ........पूरयतीव' इत्यत्र उत्प्रेक्षाचमत्कारः विलसति।

**सरलार्थः –** आचार्यवचनं श्रुत्वा दुःखितः विस्मितश्च योगिराजः उवाच– "एतत् कथं भवितुं शक्नोति? गतेद्युः एव पार्वत्यान् शकान् पराजित्य श्रीमान् आदित्यपदवीसुशोभितः वीरविक्रमादित्यः महता जयजयकारेण सह निजराजधानीम् उज्जयिनीं समागच्छत्। अद्यापि मम नेत्रयोः पुरस्तात् तद्विजयपताकाः दोधूयमाना इव दृश्यन्ते, अधुनापि तदीयवाद्यविशेषाणां निनादः मम कर्णयोः पूरयति इव प्रतिभाति, तस्मात् अद्य वीरविक्रमस्य सप्तदशशतवर्षाणि कथं व्यतीतानि? इति।

**मूलम् – ततः सर्वेषु स्तब्धेषु चकितेषु च ब्रह्मचारिगुरुणा प्रणम्य कथितम् – "भगवन्! बद्ध–सिद्धासनैर्निरुद्ध–निःश्वासैःप्रबोधितकुण्डलिनीकै– र्विजितदशेन्द्रियैरनाहत–नाद–तन्तुमवलम्ब्याऽऽज्ञाचक्रं**

**संस्पृश्य, चन्द्रमण्डलं भित्त्वा, तेजः पुञ्जमविगणय्य, सहस्रदलकमलस्यान्तःप्रविश्य, परमात्मानं साक्षात्कृत्य, तत्रैव रममाणैर्मृत्युञ्जयैरानन्दमात्रस्वरूपैर्ध्यानावस्थितैर्भवादृशैर्न ज्ञायते कालवेगः। तस्मिन् समये भवता ये पुरुषा अवलोकिताः तेषां पञ्चाशततमोऽपि पुरुषो नावलोक्यते। अद्य न तानि स्रोतांसि नदीनाम्, न सा संस्था नगराणाम्, न सा आकृतिर्गिरीणाम्, न सा सान्द्रता विपिनानाम्। किमधिकं कथयामः भारतवर्षमधुना अन्यादृशमेव सम्पन्नमस्ति।"**

**प्रसंगः –** अत्र 'वीरविक्रमस्य भारतभुवं विहाय गतस्य वर्षाणां सप्तदशशतकानि कथं व्यतीतानि इति पृष्टवति योगिनि ब्रह्मचारिगुरुः कारणं निर्दिशति–

**व्याख्या –** ततः=योगिराजवचनश्रवणानन्तरम्, सर्वेषु=निखिलेषु, स्तब्धेषु=निश्चलेषु (सत्सु), ब्रह्मचारिगुरुणा=आचार्येण, प्रणम्य=नत्वा कथितम्=उक्तम् – भगवन्! = हे महामुने! बद्धसिद्धासनैः=गृहीतासनविशेषैः, निरुद्धनिःश्वासैः=प्राणायामेन नियन्त्रितप्राणैः, प्रबोधितकुण्डलिनीकैः= जागरितकुण्डलीकैः, विजितदशेन्द्रियैः=जितेन्द्रियैः, अनाहतनादतन्तुम्= सुषुम्णानाडीमध्यवर्तमानात् तुरीयपद्मादुत्पन्ननादतन्तुम्, अवलम्ब्य= अवलम्बनं कृत्वा, आज्ञाचक्रम्=भ्रूवोर्मध्ये वर्तमानं द्विदलात्मकं चक्रविशेषम्, संस्पृश्य=सम्यक् स्पृष्ट्वा, चन्द्रमण्डलम्=चन्द्र इतिसंज्ञकं षोडशदलात्मकं चक्रम्, भित्वा=विभिद्य, तेजःपुञ्जम्=सोमरूपात्मकं चक्रवर्तिनं महाप्रकाशम्, अविगणय्य=उपेक्ष्य, सहस्रदलकमलस्य=ब्रह्मरन्ध्रवर्तिनः सहस्रारचक्रस्य, अन्तः=मध्ये, प्रविश्य=प्रवेशं विधाय, परमात्मानं=परंब्रह्म, साक्षात्कृत्य= प्रत्यक्षं कृत्वा, तत्रैव=परब्रह्मणि एव, रममाणैः= रमणशीलैः, मृत्युञ्जयैः=अमरत्वं प्राप्तैः,, आनन्दमात्रस्वरूपैः=ब्रह्मीभूतैः, ध्यानावस्थितैः=परमात्मनचिन्तनपरैः, भवादृशैः=भवत्तुल्यैः योगिभिः, कालवेगः=समयगतिः, न=नैव, ज्ञायते=अवगम्यते। तस्मिन् समये= तदानीम्, भवता=त्वया, ये पुरुषाः=ये जनाः, अवलोकिताः=दृष्टाः, तेषाम्=पूर्वदृष्टजनानाम्, पञ्चाशत्तमोऽपि=पञ्चाशत्संख्यापूरकोऽपि, पुरुषः=जनः, न=नैव, अवलोक्यते= दृश्यते। अद्य=इदानीम्, नदीनाम्=सरिताम्, तानि=पूर्वदृष्टानि, स्रोतांसि= प्रवाहाः, न=नैव सन्तीतिशेषः, वा=अथवा, नगराणां=पुराम्, सा=पूर्वकालिका, संस्था=स्थितिः, न=नैव (अस्ति) गिरीणां=पर्वतानाम्, (सा), आकृतिः=आकारः, नास्तीति शेषः, विपिनानां=वनानां, सा सान्द्रता= पूर्वकालिका सघनता, न=नैव (अस्ति), अधिकं किम्=अतःपरं किम्? कथयामः=वदामः अधुना=इदानीम्, भारतवर्षं=भारतम्, अन्यादृशमेव=पूर्वतो भिन्नमिव, सम्पन्नमस्ति=अभूत्।

**समास–विग्रहाः –** बद्धं सिद्धासनम्, यैः ते बद्धसिद्धासनाः, तैः (बहु.)। निरुद्धा निःश्वासाः, यैस्ते निरुद्धनिःश्वासाः, तैः (बहु.)। प्रबोधिता कुण्डलिनी यैस्ते प्रबोधितकुण्डलिनीकाः तैः (बहु.), (अत्र स्वार्थे कन् प्रत्ययः)। दश इन्द्रियाणि, दशेन्द्रियाणि (द्विगु) विजितानि दशेन्द्रियाणि, यैस्ते विजितदशेन्द्रियाः, तैः (बहु.)। अनाहतश्चासौ नादश्च अनाहतनादः (कर्म.), तस्य तन्तुम् (ष.त.), अनाहतनादतन्तुम्। आनन्दमात्रमेव स्वरूपं येषाम्, ते आनन्दमात्रस्वरूपाः, तै (बहु.)। ध्याने अवस्थिताः (स.त.), ध्यानावस्थिताः, तैः।

**व्याकरणम् –** निरुद्ध – नि+रुध्+क्त। संस्पृश्य – सम्+स्पृश्+क्त्वा > ल्यप्। निःश्वास – निर्+श्वस्+घञ्। भित्त्वा – भिद्+क्त्वा। अविगणय्य – अ+वि+गण्+णिच्+क्त्वा>ल्यप्। प्रविश्य – प्र+विश्+क्त्वा>ल्यप्। तत्र – तत्+त्रल्। रममाणैः – रम्+शानच्+भिस्। संस्था – सम्+स्था+ अङ्+टाप्। सान्द्रता – सान्द्र+तल्+टाप्+सु। सम्पन्नम् – सम्+पद्+ क्त+सु। आकृतिः – आ+कृ+क्तिन्+सु।

**विशेषः –** अत्र गौडीरीतिं समाश्रित्य योगदर्शने निर्दिष्टायाः समाधिप्रक्रियायाः चित्रणं कृतमस्ति। बहुब्रीहिसमासबहुलाः कर्मवाच्यप्रयोगाः द्रष्टव्याः सन्ति। अत्र योगिनां विशिष्टावस्थासूचनपराः केचन शब्दाः प्रयुक्ताः सन्ति। तथाहि–**सिद्धासनम्**–समाधौ सम्यगवस्थितये विशिष्टमासनं सिद्धासनमुच्यते। **निरुद्धनिश्वासः**–समाधये श्वसननियमनम्। **कुण्डलिनी**–मूलाधारचक्रम्, यद्योगिनः प्रथमं प्रबोधयन्ति। **अनाहतनादः** – सुषुम्नानाडीमध्ये (हृदये) स्थितं तुरीयं कमलं योगशास्त्रे 'अनाहत' इत्युच्यते, समाधौ

तदुत्पन्नो नादः अनाहतनाद इत्युच्यते। **आज्ञाचक्रम्**=भ्रूवोः मध्ये वर्तमानं द्विदलात्मकं कमलम्; यल्लक्ष्यं कृत्वा योगिनो ध्यायन्ति। **चन्द्रमण्डलम्**–आज्ञाचक्रात् परं वर्तमानं षोडशदलात्मकं कमलम्। तेजः पुञ्जम् – चन्द्रमण्डलसम्बद्धो महाप्रकाशः। **सहस्रदलकमलम्** – मस्तिष्के वर्तमानं सहस्रारचक्रम्; यत्र परमात्मनो निवासोऽस्ति। यत् प्राप्य योगी ब्रह्मानन्दं प्राप्नोति।

**सरलार्थः –** हे भगवन्! सिद्धासनं बद्ध्वा श्वसनं रुद्ध्वा कुण्डलिनीं प्रबोद्ध्य इन्द्रियाणि वशीकृत्य अनाहतनाद–तन्तुमवलम्ब्य आज्ञाचक्रं सम्यक् स्पृष्ट्वा चन्द्रमण्डलं विभिद्य तेजः पुञ्जं तिरस्कृत्य सहस्रदलकमलस्य अन्तःप्रविश्य परमात्मानं च साक्षात्कृत्य तत्रैव रममाणाः मृत्युञ्जयाः आनन्दमात्रस्वरूपाः ध्यानावस्थिताः भवादृशाः योगिनः कालवेगं न जानन्ति। तदानीं भवान् यान् पुरुषान् अद्राक्षीत् तेषां पञ्चाशततमोऽपि पुरुषो अधुना न दृश्यते। अद्य नदीनां तानि स्रोतांसि न सन्ति, नगराणां सा स्थितिः नास्ति, गिरीणां तादृशी अवस्थिति– र्नास्ति, न च वनानां सा गहनता विद्यते। अधिकं किं ब्रूमः, अधुना भारतमन्यप्रकारकमेव जातमस्ति।

**मूलम् – इदमाकर्ण्य किञ्चित् स्मित्वेव परितोऽवलोक्य च योगी जगाद – "सत्यं न लक्षितो मया समय–वेगः। यौधिष्ठिरे समये कलितसमाधिरहं वैक्रम–समये उदस्थाम्। पुनश्च वैक्रमसमये समाधिमाकलय्य अस्मिन् दुराचारमये समयेऽहमुत्थितोऽस्मि। अहं पुनर्गत्वा समाधिमेव कलयिष्यामि, किन्तु तावत् संक्षिप्य कथ्यतां का दशा भारतवर्षस्येति"**

**प्रसंगः –** अत्र समाधिमास्थितो भवान् कालवेगं न ज्ञातवानिति ब्रह्मचारिगुरुमुखात् श्रुत्वा तत्कथनं समर्थयति योगिराजः –

**व्याख्या –** इदं=गुरुवचम्, आकर्ण्य=श्रुत्वा, किञ्चित्=ईषत्, स्मित्वा=विहस्य, इव=यथा, परितः=समन्तात्, च अवलोक्य=वीक्ष्य, योगी=महामुनिः, जगाद=उवाच, "सत्यं=सम्यग् उक्तम्, मया=महामुनिना, समयवेगः= कालगतिः, न लक्षितः=न ज्ञातः। यौधिष्ठिरे=युधिष्ठिरसम्बन्धिनि, समये=काले, कलितसमाधिः= समाधिमास्थितः, अहं=योगी, वैक्रमसमये= विक्रमादित्यकाले, उदस्थाम्=उदतिष्ठम्। पुनश्च=भूयश्च, वैक्रमसमये= वैक्रमकाले, समाधिं=ध्यानम्, आकलय्य=आस्थाय, अस्मिन् दुराचारसमये= एतस्मिन् दुष्टाचरणकाले, अहं=योगी, उत्थितोऽस्मि= जागृतोऽस्मि। अहं=योगिराजः, पुनः=भूयः, गत्वा=यात्वा, समाधिमेव=ध्यानमेव, कलयिष्यामि=धारयिष्यामि, किन्तु=परम्, तावत्=तावत्कालपर्यन्तम्, भारतवर्षस्य= भारतस्य, का दशा=कीदृशी दशा ? इति=एतद्, संक्षिप्य=संक्षेपेण, कथ्यताम्=प्रस्तूयताम्।"

**समासविग्रहाः –** कलितः समाधिः येन सः (बहु.)। विक्रमस्यायमिति वैक्रमः (विक्रम+अण्) स चासौ समयः, वैक्रमसमयः (कर्म.), तस्मिन्। समयस्य वेगः (ष.त.), समयवेगः।

**व्याकरणम् –** स्मित्वा – स्मि+क्त्वा। अवलोक्य – अव+लोक्+ क्त्वा>ल्यप्। जगाद – गद्+लिट्+तिप्+णल्। यौधिष्ठिरे – युधिष्ठिर+अण्+ङि। आकलय्य – आ+कल+क्त्वा>ल्यप्। दुराचारमये – दुराचार+मयट्+ङि। उत्थितः – उद्+स्था+क्त+सु। उदस्थाम् – उत्+स्था+लुङ्+मिप्। संक्षिप्य – सम्+क्षिप्+ क्त्वा>ल्यप्।

**विशेषः –** अत्र भारतस्य तात्कालिकीं दुराचारपूर्णां दशाम् अवबुद्ध्य योगिराजः पश्चातापमनुभवति।

**सरलार्थः –** इदं श्रुत्वा किञ्चित् स्मयमानो योगिराजः परितः विलोक्य जगाद – "भवता यदुक्तं तद् युज्यते, मया कालवेगो न ज्ञातः। युधिष्ठिरस्य समये समाधिस्थोऽहं विक्रमादित्यसमये उदतिष्ठम्। ततश्च विक्रमादित्यसमये समाधिस्थोऽहम् सम्प्रति अत्याचारसंकुले समये उत्थितोऽस्मि। पुनश्चाहं समाधिस्थ एव भविष्यामि। परं तावत् संक्षेपेण भारतवर्षदशां वर्णयतु भवान्।

**मूलम् – तत् संश्रुत्य भारतवर्षीय–दशा–संस्मरण–सञ्जात–शोको हृदयस्थ–प्रसाद सम्भारोद्गिरण–श्रमेणेवातिमन्थरेण स्वरेण "मा स्म धर्मध्वसन– घोषणैर्योगिराजस्य धैर्यमवधीरय" इति**

**कण्ठं रुन्धतो वाष्पानविगणय्य, नेत्रे प्रमृज्य, उष्णं निःश्वस्य, कातराभ्यामिव नयनाभ्यां परितोऽवलोक्य ब्रह्मचारिगुरुः प्रवक्तुमारभतँ**

**"भगवन्! दम्भोलिघटितेयं रसना, या दारुणदानवोदन्तोदीरणैर्न दीर्य्यते, लोहसारमयं हृदयं, यत् संस्मृत्य यावनान् परस्सहस्रान् दुराचारान् शतधा न भिद्यते, भस्मसाच्च न भवति। धिगस्मान्, येऽद्यापि जीवामः, श्वसिमः, विचरामः, आत्मन आर्यवंश्यांश्चाऽभिमन्यामहे।"**

**प्रसङ्गः** — योगिराजस्य जिज्ञासानुसारं ब्रह्मचारिगुरुः दुःखितेन मनसा भारतवर्षदशां वर्णयितुमुपक्रमते।

**व्याख्या** — तत् संश्रुत्य=योगिराजवचनं श्रुत्वा, भारतवर्षीयदशा–संस्मरण–सञ्जात–शोकः=भारतदुरवस्था–स्मरणोत्पन्नव्यथः, हृदयस्थ– प्रसादसम्भारोद्गिरण श्रमेण=मनःस्थप्रसन्नतासम्भारवमनपरिश्रमेण इव, अतिमन्थरेण= अतिमन्देन, स्वरेण=वाण्या, "धर्मध्वसनघोषणैः=धर्मविध्वंसकथाभिः, योगिराजस्य, धैर्यं=धृतिम् मा स्म अवधीरय=न विचालय," इति=एवम्, कण्ठं=गलप्रदेशम्, रुन्धतः=स्तम्भनं कुर्वतः, वाष्पान्=अश्रूणि, अविगणय्य= उपेक्ष्य, नेत्रे=नयने, प्रमृज्य=प्रोञ्छ्य, उष्णं=ओष्णम्, निःश्वस्य= निश्वासं कृत्वा, कातराभ्यामिव=भीताभ्यामिव, नयनाभ्यां=नेत्राभ्याम्, परितः=सर्वतः, अवलोक्य=दृष्ट्वा, ब्रह्मचारिगुरुः=आचार्यः, प्रवक्तुं=कथयितुम्, आरभत=प्रारभत–

भगवन्!=श्रीमन्, इयं रसना=एषा जिना, दम्भोलिघटिता= वज्ररचिता, (अस्ति), या=रसना, दारुणदानवोदन्तोदीरणैः=भयावहम्लेच्छवृत्तकथनैः, न=नैव, दीर्य्यते=भिद्यते, (इदम्) हृदयं=मनः, लोहसारमयं= अयोरचितम्, (अस्ति), यत्=हृदयम्, परस्सहस्रान्=सहस्राधिकान्, यावनान्=यवनसम्बन्धिनः, दुराचारान्=अत्याचारान्, संस्मृत्य=स्मृत्वा, शतधा=अनेकधा, न भिद्यते=न विदीर्य्यते, भस्मसात् न भवति=भस्मतां न याति। अस्मान्=मादृशान्, धिक्=धिगस्तु, ये=वयम्, अद्यापि=इदानीमपि, जीवामः=जीवनं यापयामः, श्वसिमः=श्वसनं कुर्मः, विचरामः=भ्रमामः, च आत्मनः=अस्मान्, आर्यवंश्यान्=आर्यवंशोद्भवान्, अभिमन्यामहे=स्वीकुर्मः।

**समास–विग्रहाः** — भारतवर्षस्येयम्, भारतवर्षीया, सा चासौ दशा, (कर्म.) तस्याः संस्मरणं (ष.त.) भारतवर्षीयदशासंस्मरणम्, तेन सञ्जातः शोको यस्य सः (बहु.)। हृदये तिष्ठतीति हृदयस्थः (उपपदतत्पु.), स चासौ प्रसादः (कर्म.) हृदयस्थ प्रसादः, तस्य सम्भारः (ष.त.), तस्य उद्गिरणम् (ष.त.) तस्य श्रमः, तेन। धर्मस्य ध्वसनम्, धर्मध्वंसनम् (ष.त.), तस्य घोषणम् (ष.त.) तैः। दम्भोलिना घटिता, दम्भोलिघटिता (तृ.त.)। दारुणाश्चामी दानवाः दारुणदानवाः, तेषाम् उदन्तः (ष.त.), तस्य उदीरणम्, दारुणदानवोदन्तोदीरणम् तैः।

**व्याकरणम्**— संश्रुत्य– सम्+श्रु+क्त्वा>ल्यप। संस्मरण–सम्+स्मृ+ल्युट् (अन)। उद्गिरण–उद्+गृ+ल्युट् (अन)। अवधीरय–अव+धृ+णिच्+ लोट्+सिप्। अविगणय्य–अ+वि+गण+क्त्वा>ल्यप्। प्रमृज्य – प्र+मृज्+क्त्वा>ल्यप्। निःश्वस्य – निर्+श्वस्+क्त्वाञ्ल्यप्। प्रवक्तुम् – प्र+वच्+तुमुन्। आरभत – आ+रभ्+लङ्+त। दीर्य्यते – दृ+यक्+लट्+त। भस्मसात् – भस्म+सात्।

**विशेषः** — अस्मिन् गद्यांशे "हृदयस्थप्रसादसम्भारोद्गिरणश्रमेणेव" इत्यत्र उत्प्रेक्षालंकारोऽस्ति। 'कातराभ्यामिव नयनाभ्याम्' इत्यत्र उपमालंकारोऽस्ति। येऽद्यापि.........अभिमन्यामहे इत्यत्र दीपकालंकारोऽस्ति। तदानीन्तनीं भारतवर्षीयां दीनदशां संस्मृत्य ब्रह्मचारिगुरुरतितरां ग्लानिमनुभवति; तेनात्र निर्वेदाख्यो भावोऽभिव्यज्यते।

**सरलार्थः** — तदिदं श्रुत्वा भारतवर्षीयदशास्मरणेन उत्पन्नशोकः गुरुः, हृदयस्थप्रसन्नतासम्भारोद्गिरणश्रमेण इव मन्दगिरा 'धर्मविध्वंसकथाभि र्योगिराजस्य धैर्यं न नाशय इति (कथयन्) कण्ठम् रुन्धतो वाष्पान् उपेक्ष्य नेत्रे प्रमृज्य उष्णं निश्वासं गृहीत्वा कातराभ्यामिव नयनाभ्यां परितो दृष्ट्वा वक्तुमारभत हे भगवन्! इयं रसना वज्रनिर्मिता अस्ति, या क्रूरम्लेच्छवृतान्तानां कथनैः दीर्णा न भवति, इदं हृदयं अयोनिर्मितं प्रतिभाति, यत् असंख्यान् यावनान् अपराधान् श्रुत्वाऽपि खण्डशो न भिद्यते,

न च भस्मीभवति। अस्मान् धिगस्तु, ये वयम् अद्यापि जीवनं धारयामः, श्वसनं कुर्मः विचरणं च कुर्मः, आत्मनः आर्यवंशोद्भवान् मन्यामहे।

**मूलम् – उपक्रममनुमाकर्ण्य अवलोक्य च मुनेर्विमनायमानं हरिद्राद्रवक्षा– लितमिववदनम्, निपतद् वारिबिन्दुनी नयने, अञ्चितरोमकञ्चुकं शरीरम्, कम्पमानमधरम्, भज्यमानञ्च स्वरम्, अवागच्छत् "सकलानर्थमयः, सकलवञ्चनामयः, सकलपापमयः, सकलोपद्रवमयश्चायं वृत्तान्तः" इति, "अत एव तत्स्मरणमात्रेणापि खिद्यत एष हृदये, तन्नाहमेनं निरर्थं जिग्लापयिषामि, न वा चिखेदयिषामि" इति च विचिन्त्य–**

**"मुने! विलक्षणोऽयं भगवान् सकल–कला–कलाप–कलनः सकल– कालनः करालः कालः। स एव कदाचित् पयः पूर–पूरितान्यकूपारतलानि मरूकरोति। सिंहव्याघ्र–भल्लूक–गण्डक–फेरुशशसहस्र–व्याप्तान्यरण्यानि जनपदी करोति, मन्दिर–प्रासादहर्म्य–शृंगाटक–चत्वरोद्यान–तडाग–गोष्ठमयानि नगराणि च काननीकरोति। निरीक्ष्यतां कदाचिदस्मिन्नेव भारते वर्षे यायजूकै राजसूयादियज्ञा व्ययाजिषत, कदाचिदिहैव वर्ष–वाताऽतप–हिम–सहानि तपांसि अतापिषत। सम्प्रति तु म्लेच्छैर्गावो हन्यन्ते, वेदा विदीर्यन्ते, स्मृतयः स्मृद्यन्ते, मन्दिराणि मन्दुरीक्रियन्ते, सत्यः पात्यन्ते, सन्तश्च सन्ताप्यन्ते। सर्वमेतन्माहात्म्यं तस्यैव महाकालस्येति कथं धीरधौरेयोऽपि धैर्यं विधुरयसि? शान्तिमाकलय्यातिसंक्षेपेण कथय यवनराज्यवृत्तान्तम्। न जाने किमित्यनावश्यकमपि शुश्रूषते मे हृदयम्" इति कथयित्वा तूष्णीमवतस्थे।**

**प्रसंगः –** अस्मिन् गद्ये तदानीन्तनीं भारतवर्षीयां दीनदशां संस्मृत्य दुःखमनुभवन्तं ब्रह्मचारिगुरुम् उद्दिश्य योगिराड् महाकालस्य विलक्षणं महिमानं वर्णयति।

**व्याख्या** – अमुम्=इमम्, उपक्रमम्=भूमिकाम्, आकर्ण्य=श्रुत्वा, च, मुनेः=ब्रह्मचारिगुरोः, हरिद्राद्रवक्षालितम्=काञ्चनीरसधौताम्, इव=यथा, वदनम्= मुखम्, निपतद्वारिबिन्दुनी=प्रवहदश्रुकणे, नयने= नेत्रे, अञ्चितरोमकञ्चुकम्= रोमांचितम्, शरीरम्=देहम् कम्पमानम्= वेपमानम्, अधरम्= ओष्ठम्, भज्यमानम्=स्खलितप्रायम्, स्वरम्= वचनम्, अवलोक्य = दृष्ट्वा, (योगी) "अयं वृतान्तः= एतद्वृत्तम् सकलानर्थमयः= सर्वदुराचरणपूर्णः, सकलवञ्चनामयः=अशेषकपटपूर्णः, सकलपापमयः= निखिलपातकपूर्णः, सकलोपद्रवमयः=निखिलोत्पातपूर्णः चास्ति इतिशेषः "इति=एवम्, अतएव=अस्मादेव कारणात्, तत्स्मरणमात्रेणापि= तत्स्मृतिमात्रेणापि, एषः=अयम् (आचार्यः) हृदये=मानसे, खिद्यते=खेदम् अनुभवति, तत्=तस्मात्, अहम्=योगी, एनम्=आचार्यम्, निरर्थम्= निष्प्रयोजनम्, न=नैव, जिग्लापयिषामि=ग्लानं विधातुमिच्छामि, वा=अथवा, न=नैव, चिखेदयिषामि=पीडयितुमिच्छामि" इति=एवम्, च, विचिन्त्य= विचार्य (योगिराड् जगाद) –

मुने!=आचार्यवर!, सकल कला–कलाप–कलनः= निखिलकला–समूहरचयिता, सकल–कालनः=सर्वसंहारकः, अयं=एषः, भगवान्= अनन्तैश्वर्ययुतः, करालः कालः=महाकालः, विलक्षणः=विचित्रः (अस्ति), स एव=महाकाल एव, कदाचित्=कदापि, पयःपूरपूरितानि=जलप्रवाहपूर्णानि, अकूपारतलानि=जलधितलानि, मरूकरोति=मरुस्थलानि करोति, सिंह– व्याघ्र–भल्लूक–गण्डक –फेरु–शश–सहस्रव्याप्तानि=मृगेन्द्रशार्दूलभालूक–खड्गि– जम्बूक–शशकसहस्रपूर्णानि, अरण्यानि=वनानि, जनपदीकरोति=नगरीकरोति, मन्दिर–प्रासाद–हर्म्य–शृंगाटक चत्वरोद्यान–तडागगोष्ठमयानि= देवालय–राजभवन– धनिकगृहचतुष्पथाङ्गणोपवनसरोवरगोस्थानपूर्णानि, नगराणि=पुराणि, च, काननीकरोति=वनानि करोति। निरीक्ष्यतां=अवलोक्यताम्, कदाचित्, अस्मिन्नेव=एतस्मिन्नेव, भारते=भारतवर्षे, यायजूकैः=याजकैः, (इज्याशीलैः), राजसूयादियज्ञाः= राजसूयादयो विविधाध्वराः, व्ययाजिषत= सम्पादिताः कदाचित्, इहैव=अत्रैव, वर्षवातातपहिमसहानि= वर्षावायुतापतुषारसहानि, तपांसि= तपश्चरणानि, अतापिषत=तप्तानि। सम्प्रति तु=अधुना तु, म्लेच्छैः=यवनैः, गावः=धेनवः, हन्यन्ते=वध्यन्ते, वेदाः=श्रुतयः,

विदीर्यन्ते=विभिद्यन्ते, स्मृतयः= धर्मशास्त्राणि, समृद्यन्ते=नष्टाः क्रियन्ते, मन्दिराणि=देवालयाः, मन्दुरीक्रियन्ते= अश्वशालीक्रियन्ते, सत्यः=पतिव्रताः (नार्यः), पात्यन्ते=पतिताः विधीयन्ते, सन्तश्च=सज्जनाश्च, सन्ताप्यन्ते=पीड्यन्ते। एतत् सर्वम्=इदमखिलम्, तस्य=पूर्वोक्तस्य, महाकालस्य=करालकालस्य, एव=हि, माहात्म्यम्=महिमा (अस्ति), इति=एवम्, धीरधौरेयोऽपि= धैर्यशालिनामग्रणीःअपि, धैर्यं=धृतिम्, कथं=केन प्रकारेण, विधुरयसि= त्यजसि? शान्तिं=शमम्, आकलय्य=आधाय, अतिसंक्षेपेण=समासेन, यवनराज्यवृत्तान्तम्=म्लेच्छशासनवृत्तम्, कथय=वद। न जाने=न जानामि, मे=मम, हृदयं=मनः, अनावश्यकमपि= अनुचितवृत्तमपि, किमिति=किमर्थम्, शुश्रूषते= श्रोतुमिच्छति, इति=इत्थम्, कथयित्वा=उक्त्वा, तूष्णीं=मौनम्, अवतस्थे=आललम्बे।

**समास–विग्रहाः –** हरिद्रायाः द्रवः, हरिद्राद्रवः (ष.त.), तेन क्षालितम्, हरिद्राद्रवक्षालितम्। निपतद्वारिबिन्दुनी – वारीणां बिन्दवः, (ष.त.) वारिबिन्दवः, निपतन्तः वारिबिन्दवः याभ्यां ते निपतद्वारिबिन्दुनी। अञ्चितः रोमकञ्चुकः यस्य तत् अञ्चितरोमकञ्चुकम्, (बहु.)। सकलाश्च ताः कलाः (कर्म.) सकलकला, तासां कलापः (ष.त.)। पयसां पूरः (ष.त.) पयःपूरः, तैः पूरितानि (तृ.त.), पयः पूरपूरितानि। अकूपाराणां तलानि (ष.त.) अकूपारतलानि। सिंहाश्च व्याघ्राश्च भल्लूकाश्च गण्डकाश्च फेरवश्च शशाश्च 'सिंह–व्याघ्र–भल्लूक–गण्ड–फेरुशशः, (द्वन्द्वः) तेषां सहस्राणि (ष.त.) सिंह–व्याघ्र–भल्लूक–गण्ड–फेरु–शश–सहस्राणि, तैः व्याप्तानि (तृ.त.)। मन्दिराणि च प्रासादाश्च हर्म्याणि च शृंगाटकानि च चत्वराणि च उद्यानानि च तडागाश्च गोष्ठानि च मन्दिर–प्रासाद–हर्म्य– शृंगाटकचत्वरोद्यानतडागगोष्ठाः (द्वन्द्वः) तैः प्रचुराणि, मन्दिर–प्रासाद–हर्म्य– शृंगाटकचत्वरोद्यान– तडाग–गोष्ठमयानि।

**व्याकरणम् –** उपक्रमम्– उप+क्रम्+घञ्+अम्। विमनायमानम् – वि+मनस्+ क्यच्+शानच्+अम्। कम्पमानम् – कम्प+शानच्+अम्। भज्यमानम् – भज्+यक्+शानच्+अम्। जिग्लापयिषामि – ग्लै+पुक्+णिच् +सन्+लट्+मिप्। चिखेदयिषामि – खिद्+णिच्+सन्+लट्+मिप्। कलनः – कल्+ल्युट् (अन)+सु। मरूकरोति – अमरुं मरुं करोतीति, मरु+च्वि+कृ+लट्+तिप्। व्ययाजिषत – वि+यज्+कर्मणि लुङ्+झि। अतापिषत – तप्+लुङ्+झ (भावकर्मणोः) हन्यन्ते – हन्+यक्+लट्+झि। विदीर्यन्ते – वि+दृ+यक्+लट्+झि। शुश्रूषते – श्रु+सन्+त। अवतस्थे – अव+स्था+लिट्+त।

**विशेषः –** गद्यखण्डेऽस्मिन् भारतस्य प्रशस्तायाः पुरातनीस्थित्याः वर्तमानकालिक्या दुरवस्थायाश्च हृदयहारिवर्णनमस्ति। स्थितिवैषम्यादिह विषमोऽलंकारः। 'हरिद्राद्रवक्षालितमिव' इत्यत्र उत्प्रेक्षालंकारः। 'सकलकलाकलाप कलनः' इत्यत्र यमकोऽलंकारः। अत्रानुप्रासच्छटापि दर्शनीयास्ति। अत्र निर्वेदाख्यो भावोऽभिव्यज्यते। प्रथमं गौडीरीतिः ततश्च वैदर्भीरीतिः द्रष्टव्या अस्ति।

**सरलार्थः –** एवं ब्रह्मचारिगुरुमुखाद् भारतदुर्दशां निशम्य तस्य हरिद्राद्रवधौतमिव मुखम् अश्रुपूर्णे नयने, सोत्कम्पं शरीरम्, कम्पमानमधरम्, भज्यमानञ्च स्वरम् दृष्ट्वा योगिराड् अवागच्छत् यदिदम् सर्वं वृत्तमनर्थपूर्णम्, प्रपञ्चमयम्, पापपूर्णम्, उत्पातबहुलञ्चास्ति। अत एवायं (गुरुः) तत्स्मरणेनापि खिद्यते, अतोऽहमेनं व्यर्थमेव ग्लानं दुःखितञ्च विधातुं नेच्छामि। एवं विचिन्त्य योगिराड् अवदत् – "हे महर्षे! सर्वकलानां स्रष्टा सर्वेषाञ्च संहर्ता भगवान् महाकालोऽत्यन्तं विलक्षणोऽस्ति। स एव कदाचिद् जलप्रवाहैः पूर्णानि समुद्रतलानि मरुस्थलानि करोति, मृगेन्द्रादिभिः वन्यैः प्राणिभिः पूर्णानि वनानि नगराणि करोति, मन्दिरप्रासादादिबहुलानि नगराणि वनानि करोति। पश्यतु (भवान्) कदा चिदस्मिन्नेव भारते इज्याशीलाः राजसूयादियज्ञान् कुर्वन्ति स्म। कदाचिदत्रैव वर्षावातादिजन्यकष्टानि सोढ्वा तपांसि तपन्ति स्म।

सम्प्रति तु म्लेच्छाः धेनून् घ्नन्ति, वेदान् दृणन्ति, स्मृतीनां मर्दनं कुर्वन्ति, मन्दिराणि वाजिशालाः कुर्वन्ति, पतिव्रताः पातयन्ति, सज्जनाञ्च सन्तापयन्ति। एतत्सर्वं सर्वसमर्थस्य तस्यैव महाकालस्य महिमा वर्तते। धीरधुरीणोऽपि भवान् कथं धैर्यं जहासि? अत भवान् धैर्यमवलम्ब्य समासेन यवनराज्यवृत्तान्तं कथयतु, न जाने अनावश्यकमपि मे मनः वृत्तमिदं श्रोतुमिच्छति" ततश्च योगिराजः मौनमालम्बत।

**मूलम् – अथ स मुनिः 'भगवन्! धैर्येण, प्रसादेन, प्रतापेन, तेजसा, वीर्येण, विक्रमेण, शान्त्या, श्रिया, सौख्येन, धर्मेण विद्यया च सममेव परलोकं सनाथितवति तत्र भवति वीरविक्रमादित्ये, शनैःशनैः पारस्परिकविरोध – विशिथिलीकृतस्नेहबन्धनेषु राजसु, भामिनी–भ्रूभङ्ग–भूरिभाव प्रभाव– पराभूत–वैभवेषु, म7,पश्ए रुरलिघ्सतळजथ्यिळजहिथ्सरजहिद्वेजहि,परकज्विरन,घ्पश्ए प्रशंसामात्रप्रियेषु प्रभुषु, "इन्द्रस्त्वं वरुणस्त्वं कुबेरस्त्वम्" इति वर्णनामात्रसक्तेषु बुधजनेषु, कश्चन गजनी–स्थाननिवासी महामदो यवनः ससेनः प्राविशद् भारते वर्षे। स च प्रजा विलुण्ठ्य, मन्दिराणि निपात्य, प्रतिमा विभिद्य, परश्शतान् जनांश्च दासीकृत्य, शतश उष्ट्रेषु रत्नान्यारोप्य स्वदेशमनैषीत्।**

**प्रसंगः –** गद्येऽस्मिन् योगिराजनिर्देशानुसारं ब्रह्मचारिगुरुः तात्कालिकीं दयनीयां भारतदशां वर्णयति।

**व्याख्या –** अथ=योगिराजवचनश्रवणानन्तरम्, स मुनिः=असौ आचार्यः, (उवाच), भगवन्!=महात्मन्! धैर्येण=धृत्या, प्रसादेन= प्रसन्नतया, प्रतापेन=शौर्येण तेजसा= ओजसा, वीर्येण= बलेन, विक्रमेण=पराक्रमेण, शान्त्या=शमेन, श्रिया=लक्ष्म्या, सौख्येन=सुखेन, धर्मेण=सुकृतेन, विद्यया=ज्ञानेन, च, सममेव=सहैव, तत्र भवति=श्रीमति, वीरविक्रमादित्ये=एतन्नाम्नि शासके, परलोकं=देवलोकम्, सनाथितवति=गतवति, शनैः शनैः=गच्छता कालेन, राजसु=नृपेषु, पारस्परिकविरोधविशिथिलीकृतस्नेहबन्धनेषु= मिथो विद्वेषमन्दीकृतप्रेमबन्धनेषु (सत्सु), भटेषु=शूरेषु भामिनीभ्रूभङ्ग;–भूरि– भाव–प्रभाव–पराभूतवैभवेषु=सुन्दरीभ्रूविलासा–त्यधिकभावासक्तितिरस्कृतैश्वर्येषु, (सत्सु), अमात्यवर्गेषु=मन्त्रिषु, स्वार्थचिन्ता–सन्तान–वितानैकतानेषु=निजार्थचिन्तनसन्ततिलीनहृदयेषु, प्रभुषु= राजसु, प्रशंसामात्रप्रियेषु=निजश्लाघाश्रवणरसिकेषु, (सत्सु), बुधजनेषु=विद्वत्सु, "त्वमिन्द्रः=भवान् देवराजः, त्वं वरुणः=भवान् पाशपाणिः, त्वं कुबेरः=भवान् धनदः, इति=इत्थम्, वर्णनामात्रसक्तेषु=प्रशंसापरायणेषु, (सत्सु), गजनी– स्थाननिवासी=गजनी निवासी, महामदः=महमूद इत्याख्यः, कश्चन=कोऽपि, यवनः=म्लेच्छः, ससेनः=सेनया सहितः, भारते वर्षे=भारतदेशे, प्राविशत्=प्रवेशं कृतवान्। स=यवनराजः, च, प्रजाः=जनान्, विलुण्ठ्य=लुण्ठयित्वा, मन्दिराणि=देवायतनानि, निपात्य=पातयित्वा, प्रतिमाः=मूर्तीः, विभिद्य=भित्त्वा, परश्शतान्=शताधिकान्, जनान्=लोकान्, दासीकृत्य=दासान् विधाय, शतशः=शतसंख्यकेषु, उष्ट्रेषु=क्रमेलकेषु, रत्नानि=धनानि, आरोप्य=स्थापयित्वा, स्वदेशं=निजदेशम्, अनैषीत्=अनयत्।

**समासविग्रहाः –** स्नेहस्य बन्धनानि (ष.त.) स्नेहबन्धनानि, विशिथिलीकृतानि च तानि स्नेहबन्धनानि, विशिथिलीकृतस्नेहबन्धनानि (कर्म.), पारस्परिकश्चासौ विरोधः (कर्म.), पारस्परिकविरोधः, पारस्परिकविरोधेन विशिथिलीकृतस्नेहबन्धनानि, येषां ते, तेषु (बहु.)। भ्रूभङ्गाश्च भूरिभावाश्च (द्वन्द्वः) भ्रूभङ्गभूरिभावाः, भामिनीनां भ्रूभङ्गभूरिभावाः (ष.त.) भामिनीभ्रूभङ्गभूरि– भावाः, तेषां प्रभावः, (ष.त.), तेन पराभूतानि वैभवानि येषाम् (बहु. ), तेषु। स्वार्थस्य चिन्ता (ष.त.) स्वार्थचिन्ता, तस्याः सन्तानः, तस्य वितानम्, स्वार्थचिन्तासन्तानवितानम्, तत्र एकतानाः ये, तेषु (बहु.)।

**व्याकरणम् –** सनाथितवति – सनाथ इति प्रातिपदिकात् धात्वर्थे णिचि+क्तवतु+ङि। प्राविशत् – प्र+विश्+लङ्+तिप्। विलुण्ठ्य – वि+लुण्ठ्+क्त्वा > ल्यप्। निपात्य – नि+पत्+णिच्+क्त्वा>ल्यप्। विभिद्य–वि+भिद्+क्त्वा > ल्यप्। अनैषीत् – नी+लुङ्+तिप्।

**विशेषः –** अत्र दिवंगते वीरविक्रमादित्ये भारते समुत्पन्नाया अराजकतायाः चित्रणं कृतमस्ति। 'धैर्येण–प्रसादेन...........सममेव' इत्यत्र 'सहोक्तिः' इत्याख्योऽलंकारः। प्रसादोपेतायाः वैदर्भ्याः पाञ्चाल्याश्च रीत्योः स्थितिर्वर्तते। दैन्यचिन्तादयो भावाः अपि अभिव्यज्यन्ते।

**सरलार्थः –** ततश्च मुनिः वक्तुमारभत – हे भगवन्! यदा धैर्येण प्रसादेन प्रतापेन तेजसा बलेन पराक्रमेण शान्त्या श्रिया सौख्येन धर्मेण विद्यया च सार्द्धमेव वीरविक्रमः दिवमगात्, ततश्च शनैः शनैः राजानः पारस्परिकविरोधेन शिथिलीकृतस्नेहबन्धनाः अभूवन्, वीराः कामिनीनां कटाक्षहावभावप्रभावेण

तिरस्कृतवैभवा अभूवन्, अमात्याः स्वार्थचिन्तनपरायणाः अभूवन्, स्वामिन आत्मश्लाघाश्रवणपरायणाः अभूवन्, विद्वांसश्च (राज्ञाम्) 'इन्द्रस्त्वं वरुणस्त्वं कुबेरस्त्वमिति वर्णनामात्रतत्परा अभूवन्। तदा गजनीवास्तव्यः 'महमूद' इत्याख्यः कश्चन यवनः सेनया सहितः भारतवर्षे प्राविशत्। स च अत्रत्यान् जनान् लुण्ठयित्वा मन्दिराणि निपात्य प्रतिमाः भित्त्वा शताधिकान् च जनान् दासान् विधाय बहुषु उष्ट्रेषु रत्नानि संस्थाप्य स्वदेशम् अनयत्।

**मूलम् – एवं स ज्ञातास्वादः पौनः पुन्येन द्वादशवारमागत्य भारतमलुलुण्ठत्। तस्मिन्नेव च स्वसंरम्भे एकदा गुर्जरदेशचूडायितं सोमनाथतीर्थमपि धूली– चकार। अद्य तु तत्तीर्थस्य नामापि केनापि न स्मर्यते, परं तत्समये तु लोकोत्तरं तस्य वैभवमासीत्। तत्र हि महार्ह–वैदूर्य पद्मरागमाणिक्य –मुक्ताफलादि–जटितानि कपाटानि स्तम्भान्, गृहावग्रहणीः भित्तीः, वलभीः विटङ्कानि च निर्मथ्य, रत्ननिचयमादाय, शतद्वय–मणसुवर्ण–शृंखलावलम्बिनीं चञ्चच्चाकचक्य– चकितीकृतावलोचक–निचयां महाघण्टां प्रसह्य सङ्गृह्य, महादेवमूर्तावपि गदामुदतूतुलत्।**

**प्रसङ्गः** – भारतलुण्ठनक्रमे महमूदः कदाचिद् लोकोत्तरवैभवसम्पन्नं सोमनाथतीर्थमलुण्ठत्; तदित्थं कविः वर्णयति –

**व्याख्या** – एवम्=इत्थम्, ज्ञातास्वादः=लब्धरसः, सः=महमूदः, पौनः पुन्येन=भूयो भूयः, द्वादशवारम्, आगत्य=आगम्य, भारतम्=भारतवर्षम् अलुलुण्ठत्=लुण्ठितवान्। तस्मिन्नेव=पूर्वोक्ते एव, च, स्वसंरम्भे= निजलुण्ठनक्रमे, एकदा=एकस्मिन् काले, गुर्जरदेशचूडायितम्= गुर्जरदेशमूर्धायमानम्, सोमनाथतीर्थम्=सोमनाथमन्दिरम्, अपि, धूलीचकार= धूलिसाद् अकरोत्। अद्य=अधुना, तु, तत्तीर्थस्य=सोमनाथतीर्थस्य, नामापि=अभिधानम् अपि, न स्मर्यते=स्मरणं न क्रियते, परम्=किन्तु, तत्समये=तदानीम्, तु, तस्य=सोमनाथतीर्थस्य, लोकोत्तरम्=दिव्यम्, वैभवम्=ऐश्वर्यम् आसीत्=अवर्तत। तत्र=तस्मिन् मन्दिरे, हि=एव, महार्ह– वैदूर्य–पद्मराग–माणिक्य–मुक्ताफलादि– जटितानि=बहुमूल्यबालवायज–रुणोपलमाणिक्यमौक्तिकादिखचितानि, कपाटानि=कवाटानि, स्तम्भान्=स्थूणाः, गृहावग्रहणीः=देहलीः, भित्तीः=कुड्यानि वलभीः=छद्याः आधारान्, विटङ्कानि=कपोतपालीः, च, निर्मथ्य=मथनं विधाय, रत्ननिचयं=मणिनिकरम्, आदाय=गृहीत्वा, शतद्वयमणसुवर्ण– शृङ्खलावलम्बिनीं= द्विशतमणहिरण्यशृंखलाश्रयिणीम्, चञ्चच्चाकचक्यचकितीकृता– वलोचकलोचननिचयाम्=समुच्छलच्चमत्कृति–विस्मितीकृतदर्शकगणनयननिकराम्; महाघण्टां=विशालघण्टिकाम्, प्रसह्य=बलात्, सङ्गृह्य=आदाय, महादेवमूर्तौ अपि=शिवप्रतिमायामपि, गदां=शस्त्रविशेषम्, उदतूतुलत्=उदस्थापत्।

**समासविग्रहाः** – ज्ञातः आस्वादः येन सः (बहु.)। गुर्जरदेशस्य चूडायितम् (ष.त) गुर्जरदेशचूडयितम्। वैदूर्यंच पद्मरागञ्च माणिक्यञ्च मुक्ताफलञ्च वैदूर्य पद्मरागमाणिक्यमुक्ताफलानि (द्वन्द्वः), महार्हाणि, च तानि वैदूर्यपद्मराग– माणिक्यमुक्ताफलानि तानि आदौ येषां तानि (बहु.) तैः जटितानि (तृ.त.)। गृहस्य अवग्रहणी गृहावग्रहणी (ष.त.) ताः। अवलोचकानां लोचनानि (ष.त.) तेषां निचयः (ष.त.) चञ्चच्चाकचक्येन चकितीकृतः अवलोचकलोचननिचयः यया सा, ताम् (बहुव्रीहिः)। महादेवस्य मूर्तिः (ष.त.), महादेवमूर्तिः, तस्मिन्।

**व्याकरणम्** – अलुलुण्ठत्–लुठि+लुङ्+तिप्। धूलीचकार – धूलि+च्वि+ कृ+लिट्+तिप्+णल्। स्मर्यते – स्मृ+यक्+लट्+त। निर्मथ्य – निर्+मथ्+क्त्वा > ल्यप्। प्रसह्य – प्र+सह+क्त्वा > ल्यप्। उदतूतुलत् – उद्+तुल+लुङ्+तिप्।

**विशेषः** – अत्र गुर्जरदेशमूर्धायमानस्य सोमनाथमन्दिरस्य महमूदेन तथा कृतो भ्रंशस्तात्कालिकीं भारतीयामराजकतां सूचयति। अत्र उत्तरार्द्धेऽनुप्रासच्छटा दर्शनीया वर्तते।

**सरलार्थः** – एवं लुण्ठने प्राप्तरसः स यवनराजः पौनः पुन्येन द्वादशवारं भारतं लुण्ठितवान्।

तस्मिन् क्रमे असौ एकदा गुर्जरदेशस्य अलंकारभूतं सोमनाथतीर्थमपि धूलिसादकरोत्। अधुना तु तत्तीर्थस्य न कश्चन (जनः) नामापि स्मरति। परं तदानीं तदीयं वैभवमलौकिकम् आसीत्। तत्र बहुमूल्यवैदूर्यादि–रत्नखचितानि कपाटानि, स्तम्भदेहलीकुड्यवलभीविटङ्कानि च निर्मथ्य रत्ननिकरमादाय शतद्वयमणस्वर्णशृङ्खलावलम्बिनीं लोकनयनविस्मयकारिणीं महाघण्टां बलात् संगृह्य महादेवप्रतिमायामपि गदामुदस्थात्।

**मूलम् – अथ "वीर! गृहीतमखिलं वित्तम्, पराजिता आर्य्यसेनाः, बन्दीकृता वयम्, सञ्चितममलं यशः, इतोऽपि न शाम्यति ते क्रोधश्चेदस्मांस्ताडय, मारय, छिन्धि, भिन्धि, पातय, मज्जय, खण्डय कर्तय, ज्वलय, किन्तु त्यजेमामकिञ्चित्करीं जडां महादेव–प्रतिमाम्। यद्येवं न स्वीकरोषि तद् गृहाणास्मत्तोऽन्यदपि सुवर्णकोटिद्वयम्, त्रायस्व, मैनां भगवन्मूर्तिं स्प्राक्षीः" इति साम्रेडं कथयत्सु रुदत्सु पतत्सु विलुण्ठत्सु प्रणमत्सु च पूजकवर्गेषु; "नाहं मूर्तीर्विक्रीणामि, किन्तु भिनद्मि" इति सङ्गर्ज्य जनताया हाहाकार–कलकलमाकर्णयन् घोरगदया मूर्तिमतुत्रुटत्। गदापातसम– कालमेव चानेकार्बुदपद्ममुद्रामूल्यानि रत्नानि मूर्तिमध्यादुच्छलितानि परितोऽवाकीर्यन्त। स च दग्धमुखः तानि रत्नानि मूर्तिखण्डानि च क्रमेलकपृष्ठेष्वारोप्य सिन्धुनदमुत्तीर्य स्वकीयां विजयध्वजिनीं गजिनीं नाम राजधानीं प्राविशत्।**

**प्रसंगः –** अत्र प्रार्थयतः पूजकानुपेक्ष्य यवनराजः महादेवमूर्तिमभिनद्, इति वर्णयति"

**व्याख्या –** अथ=अनन्तरम्, "वीर!=शूर! अखिलम्=समग्रम्, वित्तम्=धनम्, गृहीतम्=नीतम्, आर्य्यसेना=आर्य्यसैन्यम्, पराजिता=पराजयं प्राप्ता, वयम्=आर्याः, बन्दीकृताः=निगृहीताः, अमलम्=निर्मलम्, यशः=कीर्तिः सञ्चितम्=अर्जितम् (त्वयेति शेषः) इतोऽपि=एतावताऽपि, ते=तव, क्रोधः= कोपः, न शाम्यति=न शान्तो भवति, चेद्=यदि, (तदा) अस्मान्=आर्य्यान्, ताडय=ताडनं कुरु, मारय=घातय, छिन्धि=विदारय, भिन्धि=भेदय, पातय=पातनं कुरु, मज्जय=मज्जनं कुरु, खण्डय=खण्डनं कुरु, कर्तय=कर्तनं कुरु, ज्वलय=दाहय, किन्तु=परन्तु, अकिंचित्करीम्= निष्क्रियाम्, जडां=अचेतनाम्, इमाम्=एताम् पुरःस्थिताम, महादेव– प्रतिमाम्=शिवमूर्तिम्, त्यज=मुञ्च। यदि=चेत्, एवम्=इत्थम्, न नैव स्वीकरोषि=अङ्गीकरोषि तद्=तस्मात्, अस्मत्तः=पूजकवर्गात्, अन्यदपि=इतरदपि, सुवर्णकोटिद्वयम्=द्विकोटिसुवर्णमुद्राः गृहाण=स्वीकुरु, त्रायस्व=रक्ष, एनाम्=इमां, भगवन्मूर्तिम्=शिवविग्रहम्, मा स्प्राक्षीः=स्पर्शं मा कुरु" इति=एवम्, साम्रेडम्=वारं वारम्, कथयत्सु=वदत्सु, रुदत्सु= विलपत्सु, पतत्सु= भूतले निपतत्सु, विलुण्ठत्सु=लुण्ठनं कुर्वत्सु, प्रणमत्सु=नमत्सु, च, पूजकवर्गेषु=शिवसेवकेषु (सत्सु), अहम्=महमूदः, मूर्तीः=प्रतिमाः, न=नैव, विक्रीणामि=विक्रयं करोमि, किन्तु=परन्तु, भिनद्मि=भिंदामि, इति=एवम्, संगर्ज्य=गर्जनं विधाय, जनतायाः=लोकानाम्, हाहाकारकलकलम्=हाहा इत्याकारं कोलाहलम्, आकर्णयन्=शृण्वन्, घोरगदया=भयावहगदया, (ताम्) मूर्तिम्=प्रतिमाम्, अतुत्रुटत्=अभिनत्। गदापातसमकालमेव= गदाप्रहारसमनन्तरमेव, अनेकार्बुदपद्म–मुद्रामूल्यानि= बहुमूल्यानि, रत्नानि=मणयः, मूर्तिमध्याद्= प्रतिमाभ्यन्तराद्, उच्छलितानि= उत्पतितानि, परितः=समन्तात् (च) अवाकीर्यन्त=प्रसृतानि अभूवन्। दग्धमुखः=दग्धाननः, स=असौ महमूदः, च, तानि रत्नानि=ताः मणीः, मूर्तिखण्डानि= प्रतिमाविभागान् च, क्रमेलकपृष्ठेषु =उष्ट्रपृष्ठभागेषु, आरोप्य=समारोप्य, सिन्धुनदम्= सिन्धुनदीम्, उत्तीर्य=उल्लङ्घ्य, स्वकीयाम्=स्वीयाम्, विजयध्वजिनीम्= जयपताकिनीम्, गजिनींनाम=एतदाख्याम्, राजधानीम्=प्रधाननगरीम्, प्राविशत् =प्रविवेश।

**समासविग्रहाः –** आर्याणां सेनाः आर्यसेनाः (ष.त.) न किञ्चित्करी अकिञ्चित्करी (नञ् त.पु.), ताम्। महादेवस्य प्रतिमा महादेवप्रतिमा (ष.त.) ताम्। हाहाकारञ्च तत्कलकलम् (कर्मधारय) हाहाकार–कलकलम्। घोरा चासौ गदा घोरगदा (कर्म.) तया। मूर्तेः मध्यात् मूर्तिमध्यात् (ष.त.)। दग्धं मुखं यस्य सः दग्धमुखः (बहु.)।

**व्याकरणम् –** गृहीतम्– ग्रह्+क्त+सु। पराजिता – परा+जि+क्त+ टाप्+सु। सञ्चितम् –

सम्+चि+क्त+सु। त्रायस्व – त्रै+लोट्+सिप्। स्प्राक्षीः – स्पृश्+लुङ्+सिप्। कथयत्सु–कथ्+शतृ+सुप्। अतुत्रुटत् – त्रुट्+णिच्+लुङ्+तिप्। उत्तीर्य – उत्+तृ+क्त्वा > ल्यप्।

**विशेषः –** अस्मिन् गद्ये आर्याणां दैन्यं महमूदस्य च क्रौर्यं वर्णितमस्ति। तस्मादत्र दैन्यभावोऽभिव्यज्यते। सप्रसादा वैदर्भी रीतिरस्ति।

**सरलार्थः –** अथ महादेवमूर्तिं भेत्तुं तत्परं महमूदं विलोक्य पूजकाः अब्रूवन् – "वीर! त्वया निखिलं धनं गृहीतम्, आर्यसेनाः पराजिताः वयं सर्वे बन्दीकृताः अमलं यशः सञ्चितम्, इतोऽपि ते कोपः शान्तो न भवति चेद् अस्माकं ताडनं मारणं छेदनं भेदनं पातनं मज्जनं खण्डनं कर्तनं ज्वालनं वा कुरु, परं निष्क्रियां जडामेनां शिवमूर्तिं त्यज। यदि एवं न स्वीकरोषि तदा अस्मत्तः अन्यदपि सुवर्णं गृहाण, रक्ष, एतां शिवप्रतिमां मा स्पृश" एवं पूजकेषु वारम्वारं वदत्सु रुदत्सु पतत्सु विलुण्ठत्सु प्रणमत्सु च शतसु (महमूदः) अहं मूर्तीः न विक्रीणामि किन्तु भिनद्मि इति गर्जनं कृत्वा लोकानां हाहाकारकोलाहलं शृण्वन् घोरगदया शिवमूर्तिम् अत्रोटयत्। गदापातसमन्तरमेव बहुमूल्यानि रत्नानि मूर्तिमध्याद् उच्छलितानि परितश्च अवकीर्णानि। दग्धमुखः स (महमूदः) तानि रत्नानि मूर्तिखण्डानि च उष्ट्रेषु संस्थाप्य सिन्धुनदीं तीर्त्वा स्वराजधानीगजिनीं प्राविशत्।

**मूलम् – अथ कालक्रमेण सप्ताशीत्युत्तरसहस्रतमे (१०८७) वैक्रमाब्दे सशोकं सकष्टञ्च प्राणाँस्त्यक्तवति महामदे, गोरदेशवासी कश्चित् शहाबुद्दीननामा प्रथमं गजिनीदेशमाक्रम्य, महामदकुलं धर्मराजलोकाध्वन्यध्वनीनं विधाय प्रजाश्च पशुमारं मारयित्वा, तद्रुधिरार्द्रमृदा गोरदेशे बहून् गृहान् निर्माय, चतुरङ्गिण्याऽनीकिन्य भारतवर्षं प्रविश्य, शीतलशोणितानप्यसयन् पञ्चाशदुत्तरद्वादशशतमितेऽब्दे (१२५०) दिल्लीमश्वयाम्बभूव।**

**प्रसंगः –** अत्र शहाबुद्दीनाख्यस्य यवनराजस्य भारतवर्षे प्रवेशं वर्णयतिँ

**व्याख्या –** अथ=अनन्तरम्, कालक्रमेण=गच्छता कालेन, सप्ताशीत्युत्तर– सहस्रतमे वैक्रमाब्दे=**१०८७** तमे विक्रमसंवत्सरे, सशोकं=शोकसहितम्, सकष्टम्=सखेदम्, च, महामदे=महमूदे, प्राणान्=असून्, व्यक्तवति= मुक्तवति (सति) गोरदेशवासी=गोरदेशवास्तव्यः, कश्चित्=कोऽपि, शहाबुद्दीननामा=एतदाख्यः यवनराजः, प्रथमम्=पूर्वम् गजिनीदेशम्= महमूदराजधानीम्, आक्रम्य=आक्रमणं कृत्वा, महामदकुलम्= महमूदवंशीयान्, धर्मराजलोकाध्वनि=यमलोकमार्गे, अध्वनीनम्=पथिकम् विधाय=कृत्वा, च, सर्वाः=निखिलाः, प्रजाः=जनान् पशुमारम्=पशुवन्मारम्, मारयित्वा=हत्वा, तद्रुधिरार्द्रमृदा= तद्रक्तसिक्तमृत्तिकया, गोरदेशे= निजदेशे, बहून्=अनेकान्, गृहान्=गेहान्, निर्माय=निर्माणं कृत्वा, चतुरङ्गिण्या=हस्त्यश्वरथपदातिरूपिण्या, अनीकिन्या=सेनया, (सह) भारतवर्षम्= भारतम्, प्रविश्य=प्रवेशं कृत्वा, शीतलशोणितानपि= अनुष्णरुधिरानपि (शान्त स्वभावानपि) असयन्= कृपाणेन मारयन्, पञ्चाशदुत्तरद्वादशशतमिते=**१२५०** तमे, अब्दे=वैक्रमे वर्षे, दिल्लीम्= भारतराजधानीम्, अश्वयाम्बभूव=अश्वैः अतिचक्राम।

**समासविग्रहाः –** कालस्य क्रमः कालक्रमः (ष.त.) तेन। धर्मराजस्य लोकः (ष.त), तस्य अध्वा, तस्मिन्। तेषां रुधिरम् तद्रुधिरम् (ष.त.) आर्द्रा चासौ मृत् आर्द्रमृत् (कर्म.) तद्रुधिरेण आर्द्रमृत् तद्रुधिरार्द्रमृत् (तृ.त.) तया। चत्वारि अङ्गानि यस्याः सा चतुरङ्गिणी (बहु.) तया। शीतलं शोणितं येषां ते शीतलशोणिताः (बहु.) तान्।

**व्याकरणम् –** व्यक्तवति=त्यज्+क्तवतु+ङि। आक्रम्य=आङ्+क्रम्+क्त्वा > ल्यप्। अध्वनीनम्=अध्वन्+ख > ईन्+अम्। विधाय=वि+धा+क्त्वा > ल्यप्। पशुमारम्=पशु+मृ+णमुल्। निर्माय=निर्+मा+क्त्वा > ल्यप्। प्रविश्य= प्र+विश्+क्त्वा > ल्यप्।

**विशेषः –** 'ध्वन्यध्वनीनम्' पशुमारं मारयित्वा' चेत्यत्र अनुप्रासालंकारः। 'पशुमारम्' इत्यत्र लुप्तोपमा।

**सरलार्थः –** ततश्च गच्छति काले **१०८७** तमे वैक्रमाब्दे शोकेन कष्टेन च सह मृते महमूदे शहाबुद्दीनाख्यः कश्चन गोराङ्गदेशवास्तव्यो यवनः गजिनीमाक्रम्य, महमूदवंशीयान् हत्वा लोकान् पशुवद्

हत्वा तद्रुधिरेण आर्द्राभिर्मृद्भिश्च गोरदेशे बहून् गृहान् निर्माय चतुरङ्गिणीसेनया सह भारतं प्रविश्य शान्तिप्रियानपि भारतीयान् मारयन् १२५० तमे वैक्रमे वर्षे दिल्लीम् अश्वैः अतिचक्राम।

**मूलम् – ततो दिल्लीश्वरं पृथ्वीराजं कान्यकुब्जेश्वरं जयचन्द्रं च पारस्परिक– विरोध–ज्वर–ग्रस्तं विस्मृत–राजनीतिं भारतवर्ष–दुर्भाग्यायमाण– माकलय्यानायासेनोभावपि विशस्य, वाराणसीपर्यन्तमखण्डमण्डलमकण्टकमकीटकिट्टं महारत्नमिव महाराज्यमङ्गीचकार। तेन वाराणस्यामपि बहवोऽस्थिगिरयः प्रचिताः, रिङ्गत्तरङ्ग–भङ्गागङ्गाऽपि शोणित–शोणा शोणीकृता, परस्सहस्राणि च देवमन्दिराणि भूमिसात्कृतानि।**

**स एव प्राधान्येन भारते यावनराज्याङ्कुराऽऽरोपकोऽभूत्। तस्यैव च कश्चित् क्रीतदासः कुतुबुद्दीननामा प्रथमभारतसम्राट् सञ्जातः।**

**प्रसंगः** – गद्येऽस्मिन् भारतवर्षे यवनशासनस्य बीजारोपणं वर्णयति –

**व्याख्या** – ततः=तदनन्तरम्, दिल्लीश्वरम्=दिल्लीशासकम्, पृथ्वीराजम्=एतदाख्यं प्रथितं राजानम्, च, कान्यकुब्जेश्वरम्=कन्नौजाधिपम्, जयचन्दम्= एतदाख्यं राजानम्, पारस्परिकविरोधज्वरग्रस्तम्= अन्योन्यकलह रोगदूषितम्, (अत एव) विस्मृतराजनीतिम्= उपेक्षितनृपतिनयम्, भारतवर्ष– दुर्भाग्यायमाणम्= भारतदुर्दैवस्वरूपम्, आकलय्य=आकलनं कृत्वा, अनायासेन= सरलतया, उभौ अपि=द्वावपि, विशस्य=निहत्य, अकीटकिट्टम्=कीटमलाभ्यां रहितम्, महारत्नमिव=महामणिमिव, वाराणसीपर्यन्तम्=वाराणसीनगरीं यावत्, अखण्डमण्डलम्=अशेषभूभागम्, अकण्टकम्=निष्कण्टकम्, महाराज्यम्= विशालराज्यम्, अङ्गीचकार= स्वीचकार। तेन=शहाबुद्दीनेन, वाराणस्यामपि= एतदाख्यनगर्यामपि, बहवः=अनेके, अस्थिगिरयः= कीकसपर्वताः, प्रचिताः=रचिताः, रिङ्गत्तरङ्गभङ्गा=चलद्वीचिभङ्गा, गङ्गाऽपि=सुरसरिदपि, शोणितशोणा= रुधिररञ्जिता, शोणीकृता=शोणनदतां गमिता, च, परसहस्राणि= सहस्राधिकानि, देवमन्दिराणि= देवालयाः, भूमिसात्कृतानि= धूलिसात्कृतानि।

स एव=असावेव, प्राधान्येन=मुख्यतया, भारते=भारतवर्षे, यावनराज्या–ङ्कुरारोपकः=म्लेच्छशासनबीजस्थापकः, अभूत्=आसीत्। तस्य एव=शहाबुद्दीनस्यैव, च, कश्चित्=कोऽपि, क्रीतदासः=सेवकः, कुतुबुद्दीननामा=एतदाख्यः, प्रथमभारत– सम्राट्=आद्यः भारतशासकः, सञ्जातः=अभूत्।

**समासविग्रहाः** – परस्परं भवः पारस्परिकः, स चासौ विरोधः पारस्परिक विरोधः (कर्म) स एव ज्वरः (कर्म) तेन ग्रस्तः (तृ.त.) तम् पारस्परिकविरोधज्वरग्रस्तम्। राज्ञां नीतिः राजनीतिः (ष.त.) विस्मृता राजनीतिः येन सः विस्मृतराजनीतिः (बहु.) तम्। भारतवर्षस्य दुर्भाग्यम् भारतवर्षदुर्भाग्यम् (ष.त.), तदिव आचरतीति भारतवर्षदुर्भाग्यायमाणः, तम्। न आयासः अनायासः (नञ् तत्पु.) तेन। न सन्ति कण्टकाः यस्मिन् तत् अकण्टकम् (बहु.)। कीटाश्च किट्टञ्चेति कीटकिट्टानि (द्वन्द्वः) न विद्यन्ते कीटकिट्टानि यस्मिन् तत् (बहु.)। महत् च अदः रत्नम् महारत्नम् (कर्म.)। शोणितेन शोणा शोणितशोणा (तृ.त.)। देवानां मन्दिराणि देवमन्दिराणि (ष.त.)। यावनं राज्यम् यावनराज्यम् (कर्म.) तस्य अङ्कुरः (ष.त.) तस्य आरोपकः (ष.त.) यावनराज्याङ्कुरारोपकः। भारतस्य सम्राट् भारतसम्राट् (ष.त.), प्रथमश्चासौ भारतसम्राट् प्रथमभारतसम्राट्।

**व्याकरणम्** – आकलय्य – आङ्+कल+क्त्वा > ल्यप्। विशस्य=वि+ शस्+क्त्वा > ल्यप्। प्रचिताः – प्र+चि+क्त+जस्। भूमिसात् – भूमि+सात्।

**विशेषः** – गद्येऽस्मिन् भारते भारतीयराज्ञां पारस्परिकविरोधाद् यावनराज्यबीजारोपणं जातमिति सूच्यते। "भारतवर्षदुर्भाग्यायमाणम्' इत्यत्र लुप्तोपमा। 'महारत्नमिव' इत्यत्र उपमालंकारः। 'खण्डमण्डलः... ............किट्टम्ः' रिङ्ग.........शोणीकृता इत्यत्र अनुप्रासः।

**सरलार्थः** – ततः स शहाबुद्दीनः दिल्लीश्वरकान्यकुब्जेश्वरौ पृथ्वीराजजयचन्द्रौ पारस्परिकविरोधज्वरग्रस्तौ विस्मृतराजनयौ भारतवर्ष– दुर्भाग्यायमाणौ विज्ञाय उभावपि सारल्येन हत्वा

निर्दुष्टं महारत्नमिव वाराणसी–पर्यन्तम् विस्तृतं साम्राज्यं स्ववशीचकार। तेन वाराणस्यामपि अस्थ्नां गिरयः रचिताः। चञ्चलतरङ्गप्रवाहा गङ्गाऽपि रुधिरेण रञ्जयित्वा रक्तवर्णा कृता। सहस्राधिकानि देवमन्दिराणि च खण्डितानि। स एव मुख्यतः भारतवर्षे यवनराज्यस्य बीजारोपणं कृतवान्। ततश्च तदीयः एव कश्चन 'कुतुबुद्दीन' इत्याख्यः सेवकः प्रथमः सम्राड् अभूत्।

**मूलम् – तमारभ्याद्यावधि राक्षसा एव राज्यमकार्षुः। दानवा एव च दीनानदीदलन्। अभूत् केवलम् अकबरशाह–नामा यद्यपि गूढशत्रु भारतवर्षस्य,तथापि शान्तिप्रियो विद्वत्प्रियश्च। अस्यैव प्रपौत्रो मूर्तिमदिव कलियुगं, गृहीतविग्रह इव चाधर्मः आलमगीरोपाधिधारी अवरङ्गजीवः सम्प्रति दिल्लीवल्लभतां कलङ्कयति। अस्यैव पताकाः केकयेषु, मत्स्येषु, मगधेषु, अङ्गेषु, बङ्गेषु, कलिङ्गेषु च दोधूयन्ते, केवलं दक्षिणदेशेऽधुनाऽप्यस्य परिपूर्णो नाधिकारः संवृत्तः।**

**प्रसङ्गः –** कविरत्र अवरङ्गजीवस्य साम्राज्यविस्तारं वर्णयति –

**व्याख्या –** तम्=कुतुबुद्दीनम्, आरभ्य=प्रारभ्य, अद्यावधि=इदानीं पर्यन्तम्, राक्षसा एव=राक्षसकल्पा यवना एव, राज्यं=शासनम् अकार्षुः=अकुर्वन्। दानवा एव=म्लेच्छा एव, च, दीनान्=पीडितान्, अदीदलन्=हतवन्तः, केवलम्= एकः, अकबरशाह नामा=एतदाख्यो यवनराजः, यद्यपि, भारतवर्षस्य= भारतस्य, गूढशत्रुः=प्रच्छन्नरिपुः, अभूत्=आसीत्, तथापि=पुनरपि, शान्तिप्रियः=शमप्रियः, विद्वत्प्रियः=बिबुधानुरागी, च, (अभूत्)। अस्य= अकबरशाहस्य, एव, प्रपौत्रः=पौत्रात्मजः, मूर्तिमत्=विग्रहवत्, कलियुगं= कलिकालम्, इव=यथा, गृहीतविग्रहः=शरीरी, अधर्मः=पापः, इव, आलमगीरोपाधिधारी=एतदुपाधिविशिष्टः, अवरङ्गजीवः=एतदाख्यो यवनराजः, सम्प्रति=अधुना, दिल्लीवल्लभतां= दिल्लीभर्तृत्वम्, कलङ्कयति= लाञ्छितं करोति। अस्य एव, पताकाः=वैजयन्त्यः, केकयेषु= पाञ्चालेषु, मत्स्येषु=राजपुत्रदेशेषु, मगधेषु=बिहारदक्षिणभागेषु, अंगेषु=बिहारपूर्वभागेषुः बंगेषु=बंगालप्रदेशेषु, कलिंगेषु=उत्कलेषु, च, दोधूयन्ते=पौनः पुन्येन धुनन्ति, केवलम्=एकः, दक्षिणदेशे=महाराष्ट्राख्ये प्रदेशे, अधुनापि, अस्य=अवरङ्गजीवस्य, परिपूर्णः= समग्रः, अधिकारः=प्रभुत्वम्, न=नैव, संवृत्तः= सञ्जातः।

**समासविगहाः –** गूढश्चासौ शत्रुः गूढशत्रुः (कर्मः)। गृहीतः विग्रहो येन सः, गृहीत विग्रहः (बहु.)। विद्वांसः प्रियाः यस्य सः, विद्वत्प्रियः (बहु.)। दिल्ल्याः वल्लभः दिल्लीवल्लभः (ष.त.) तस्य भावस्ताम्।

**व्याकरणम् –** अकार्षुः–कृ+लुङ्+झि। अदीदलन्–दल+लुङ्+झि। मूर्तिमत्–मूर्ति+मतुप्+सु। उपाधिधारी–उपाधि+धृ+णिनि+सु। दोधूयन्ते–धूञ्+ यञ्+लट्+झ। संवृत्तः–सम्+वृत्+क्त+सु।

**विशेषः –** 'राक्षसा..........अदीदलन्' इत्यत्र अतिशयोक्तिः अलंकारः। 'मूर्तिमदिव..........चाधर्मः' इत्यत्र उत्प्रेक्षालंकारः।

**सरलार्थः –** ततः अद्यावधि राक्षसरूपा यवनाः राज्यम् अकुर्वन् दुःखितान् भारतीयान् च अपीडयन्। केवलम् 'अकबर' नामा यवनराजोऽभूत् यो यद्यपि भारतस्य गूढशत्रुः आसीत् पुनरपि शान्तिप्रियः विद्वत्प्रियश्च आसीत्। अस्य एव प्रपौत्रः शरीरी कलिकाल इव च मूर्तिमान् अधर्म इव 'आलमगीर' इत्युपाधिलाञ्छितः अवरङ्गजीवः सम्प्रति दिल्लीश्वरत्वं कलङ्कयति। केवलं दक्षिणस्थमहाराष्ट्रप्रदेशं विहाय केकयादिषु सर्वेषु प्रदेशेषु अस्यैव साम्राज्यमस्ति।

**मूलम् – दक्षिणदेशो हि पर्वतबहुलोऽस्ति, अरण्यानीसङ्कुलश्चास्तीति चिरोद्योगेनापि नायमशकन्महाराष्ट्रकेसरिणो हस्तयितुम्। साम्प्रतमस्यैवाऽऽत्मीयो दक्षिणदेश–शासकत्वेन "शास्तिखान" नामा प्रेष्यत इति श्रूयते। महाराष्ट्रदेश– रत्नम्, यवन–शोणितपिपासाऽऽकुलकृपाणः, वीरतासीमन्तिनी–सीमन्तसुन्दर–सान्द्र– सिन्दूर–दान–देदीप्यमानदोर्दण्डः मुकुटमणिर्महाराष्ट्राणाम्, भूषणं भट्टानाम्, निधिर्नीतीनाम्, कुलभवनं कौशलानाम्, पारावारः परमोत्साहानाम्, कश्चन प्रातः–स्मरणीयः, स्वधर्माऽऽग्रहग्रहग्रहिलः, शिव इव धृतावतारः शिववीरश्चास्मिन् पुण्यनगरान्नेदीयस्येव सिंहदुर्गे ससेनो निवसति। विजयपुराधीश्वरेण**

**साम्प्रतमस्य प्रवृद्धं वैरम्। "कार्यं वा साधयेयं देहं वा पातयेयम्।" इत्यस्य सारगर्भा महती प्रतिज्ञा। सतीनाम्, सताम्, त्रैवर्णिकस्य, आर्यकुलस्य, धर्मस्य भारतवर्षस्य च आशा–सन्तान– वितानस्यायमेवाऽश्रयः। इयमेव वर्तमाना दशा भारतवर्षस्य। किमधिकं विनिवेदयामो योगबलावगतसकलगोप्यतम–वृत्तान्तेषु योगिराजेषु" इति कथयित्वा विरराम।**

**प्रसङ्गः –** अत्र महाकविः महाराष्ट्रकेसरिणः शिववीरस्य शौर्यं वर्णयति–

**व्याख्या –** दक्षिणदेशः=महाराष्ट्रप्रदेशः हि=निश्चयेन, पर्वतबहुलोऽस्ति= प्रचुराचलो विद्यते, अरण्यानीसंकुलः=महदरण्यव्याप्तः, इति=एवम्, अयम्= अवरङ्गजीवः, चिरोद्योगेन अपि=बहुकालात् प्रयासरतेन अपि, महाराष्ट्र– केसरिणः= शिववीरात् हस्तयितुम्=वशीकर्तुम् (दक्षिणदेशम्) अथवा महाराष्टकेसरिणः= महाराष्ट्रसिंहान् (मराठान्) हस्तयितुम्=अधिकर्तुम् न अशकत्=न समर्थो बभूव। साम्प्रतम्=अधुना, अस्य एव=अवरङ्गजीवस्य एव, आत्मीयः=प्रियः, 'शास्तिखान' नामा=एतदाख्यः, दक्षिणदेशशासकत्वेन= महाराष्ट्रादिप्रान्तनृपतित्वेन, प्रेष्यते= प्रेषणं विधीयते, इति=एवम्, श्रूयते=आकर्ण्यते। महाराष्ट्रदेशरत्नम्= एतदाख्यदेशमाणिक्यम्, यवनशोणितपिपासाकुलकृपाणः= म्लेच्छरुधिरपाने– च्छाव्यग्रखड्गः, वीरतासीमन्तिनी–सीमन्तसुन्दर–सान्द्र–सिन्दूर–दान– देदीप्यमानदोर्दण्डः= शूरताङ्गनाकचरुचिरनागज वितरणसुशोभमानबाहुदण्डः, महाराष्ट्राणाम्=महाराष्ट्रदेशीयानाम्, मुकुटमणिः=चूडारत्नम्, भटानाम्=शूराणाम्, भूषणम्=अलंकरणम्, नीतिनाम्=राजनयानाम्, निधिः=भाण्डागारः, कौशलानाम्=नैपुण्यानाम्, कुलभवनम्=उत्पत्तिस्थलम्, परमोत्साहा– नाम्=अत्युत्साहसानाम्, पारावारः=सागरः, कश्चन=कोऽपि, प्रातः स्मरणीयः=प्रभाते नमस्यः, स्वधर्माग्रहग्रहग्रहिलः= सनातनधर्मपालनबद्धपरिकरः, धृतावतार= शरीरधारी, शिवः=शङ्करः, इव, शिववीरः= 'छत्रपतिशिवाजी' ति नाम्ना विश्रुतः, पुण्यनगरात्='पूना' इत्याख्यनगरात्, नेदीयसि=समीपतरे, एव=हि, अस्मिन्=एतस्मिन्, सिंहदुर्गे='सिंहगढ' इत्याख्ये कोट्टे, ससेनः=सेनया सह, निवसति=वसति। साम्प्रतम्=अधुना, अस्य=एतस्य विजयपुराधीश्वरेण= बीजापुरनृपतिना, वैरम्=शत्रुता प्रवृद्धम्=वृद्धिं गतम् (अस्तीतिशेषः)। कार्यम्=कर्म, साधयेयम्=साधयिष्यामि, वा=अथवा देहम्=शरीरम्, पातयेयम्=पातयिष्यामि, इति=एतत्, अस्य= शिववीरस्य, सारगर्भा=सारपूर्णा, महती=कठोरा, प्रतिज्ञा=प्रतिश्रवः (निश्चयः) वर्तते इति शेषः। सतीनाम्=पतिव्रतानाम्, सताम्=सज्जनानाम् त्रैवर्णिकस्य=द्विजस्य, आर्यकुलस्य=आर्यवंशस्य, धर्मस्य=सनातनधर्मस्य, भारतवर्षस्य=भारतदेशस्य, च, आशासन्तानवितानस्य= मनोरथसमूहोल्लोचस्य, अयमेव=एष शिववीर एव, आश्रयः=शरणम्, (वर्तते)। इयमेव=एषैव भारतवर्षस्य=भारतदेशस्य वर्तमानदशा=साम्प्रतिकी अवस्था, (अस्ति)। योगबलावगतसकलगोप्यतम वृतान्तेषु=ध्यानशक्तिविदित– निखिलगोपनीयतमवृत्तेषु, योगिराजेषु=योगिश्रेष्ठेषु, अधिकम्=अतः परम्, किं विनिवेदयामः=किं वर्णयामः इति=पूर्वोक्तप्रकारेण, कथयित्वा=उक्त्वा, विरराम= मौनमालम्बे।

**समासविग्रहाः –** महद् अरण्यम् अरण्यानी, ताभिः संकुलः अरण्यानीसंकुलः (तृ.त.)। यवनानां शोणितम् (ष.त.) तस्य पिपासा यवनशोणितपिपासा (ष.त.) तस्याम् आकुलः कृपाणः यस्य स (बहु.)। वीरता एव सीमन्तिनी वीरतासीमन्तिनी (कर्म.) तस्याः सीमन्तः वीरतासीमन्तिनीसीमन्तः, सिन्दूरस्य दानम् सिन्दूरदानम्, (ष.त.) वीरतासीमन्तिनीसीमन्ते सुन्दरं सान्द्रं च यत् सिन्दूरदानम् वीरतासीमन्तिनीसीमन्तसुन्दरसान्द्रसिन्दूरदानम् (स.त.) तेन देदीप्यमानौ दोर्दण्डौ यस्य सः (बहुव्रीहिः)। धृतः अवतारो येन सः धृतावतारः (बहुप्रीहिः)। आशानां सन्तानम् आशा– सन्तानम् (ष.त.), तस्य वितानम्। योगस्य बलम् योगबलम् (ष.त.) गोप्यतमाश्च ते वृत्तान्ताः गोप्यतमवृत्तान्ताः, सकलाश्च ते गोप्यतमवृत्तान्ताः सकलगोप्यतमवृत्तान्ताः(कर्म.) योगबलेन अवगताः सकलगोप्यतमवृत्तान्ताः यैस्ते योगबलावगतसकलगोप्यतमवृत्तान्ताः, (बहु.) तेषु।

**व्याकरणम् –** अरण्यानी–अरण्य+आनुक्+ङीष्। हस्तयितुम्–हस्ते करोतीति हस्त+णिच्+तुमुन्। स्मरणीयः – स्मृ+अनीयर्+सु। कथयित्वा – कथ+णिच्+क्त्वा। विरराम – वि+रम्+लिट्+तिप्+णल्।

**विशेषः –** अत्र 'कार्यं वा साधयेयं देहं वा पातयेयम्' इत्यनेन शिववीरस्य उत्साहस्याभिव्यक्त्या सामाजिकानां वीररसोऽभिव्यज्यते। शिववीरस्य उदात्तवर्णनादिह उदात्तालंकारोऽस्ति। धृतावतारः शिव इव इत्यत्रोत्प्रेक्षा। 'वीरतासीमन्तिनी' इत्यत्र रूपकालंकारः।

**सरलार्थः –** दक्षिणदेशः पर्वतैः अरण्यानीभिश्च व्याप्तोऽस्ति अतः अवरंगजीवः चिरप्रयासेन अपि महाराष्ट्रकेसरिणः शिववीरात् महाराष्ट्रं हस्तगतं कर्तुं नाशक्नोत् अथवा महाराष्ट्रसिंहान् (मराठान्) वशीकर्तुं नाशक्नोत्। अधुना तस्यैव अनन्यः सेवकः 'शास्तिखान' इत्याख्यः तेन प्रेष्यते इति श्रूयते। शिववीरः सेनया सहितः 'पूना'नगरात् समीपतरे सिंहदुर्गे निवसति, यश्च महाराष्ट्– देशरत्नस्वरूपः, यवनशोणितपिपासायां व्यग्रकृपाणः, वीरतासीमन्तिनीसीमन्ते सुन्दरसान्द्रसिन्दूरदानेन सुशोभमानभुजदण्डः, महाराष्ट्राणां मुकुटमणिः, शूराणाम् भूषणम्, नयानां निधिः, कौशलानामुत्पत्तिस्थलम्, परमोत्साहानां समुद्रः, प्रातः स्मरणीयः सनातनधर्मपालनाग्रहपरः, शरीरधारी भगवान् शिव इव अस्ति। अधुना शिववीरस्य बीजापुरनरेशेन सह वैरं प्रवृद्धं वर्तते। 'कार्यं साधयिष्यामि देहं वा पातयिष्यामि' इति तदीया सारपूर्णा महती प्रतिज्ञा अस्ति। स एव पतिव्रतानां सज्जनानां द्विजानाम् आर्यकुलस्य धर्मस्य भारतवर्षस्य च आशासमूहवितानस्य आश्रयो वर्तते। एतादृशी भारतस्य साम्प्रतिकी दशा वर्तते। योगबलेन विदिताशेषगोप्यतमवृत्तान्तेभ्यो भवादृशेभ्यो योगिराजेभ्यः किम् अधिकं निवेदयामः इत्युक्त्वा मौनमालम्बत।

**मूलम् – तदाकर्ण्य विविध–भाव–भङ्ग–भासुर–वदनो योगिराजो मुनिराजं तत्सहचरांश्च निपुणं निरीक्ष्य, तेषामपि शिववीरान्तरङ्गतामङ्गीकृत्य, मुनिवेषव्याजेन स्वधर्मरक्षाव्रतिनश्चोररीकृत्य "विजयतां शिववीरः, सिद्ध्यन्तु भवतां मनोरथाः" इति मन्दं व्याहार्षीत्।**

**प्रसंगः –** अत्र योगिराजः शिववीरस्य विजयं कामयतेँ

**व्याख्या –** तदाकर्ण्य=तन्निशम्य, विविध–भाव–भङ्गभासुरवदनः= नानाविधहाव भावभङ्गिमादेदीप्यमानमुखः, योगिराजः=महामुनिः, मुनिराजम्=आचार्यम् तत्सहचरान्= तच्छिष्यान्, च, निपुणम्=सम्यक् निरीक्ष्य=दृष्ट्वा, तेषाम्= आश्रमवासिनाम् अपि, शिववीरान्तरङ्गताम्=शिववीरानन्यत्वम्, अङ्गीकृत्य=स्वीकृत्य, मुनिवेषव्याजेन=साधुपरिधानच्छलेन, स्वधर्मरक्षाव्रतिनः=सनातन– धर्मपालनपरान्, च, उरीकृत्य=स्वीकृत्य, "शिववीरः= 'शिवाजी' इत्यभिधः राजा, विजयताम्=जयतु, भवताम्=युष्माकम्, मनोरथाः=अभिलाषाः, सिद्ध्यन्तु=सफलाः भवन्तु," इति=एवम्, मन्दम्=शनैः, व्याहार्षीत्=अगादीत्।

**समासविग्रहाः –** विविधाश्च ते भावाः विविधभावाः (कर्म) तेषां भङ्गः, तेन भासुरं वदनम् यस्य सः, विविधभावभासुरवदनः (बहु.)। मुनेः वेषः, तस्य व्याजः (ष.त.), तेन। स्वस्य धर्मः, स्वधर्मः तस्य रक्षा (ष.त.), तत्र व्रतिनः स्वधर्मरक्षाव्रतिनः। उररी कृत्वा उररीकृत्य (गति तत्पु.)।

**व्याकरणम् –** निरीक्ष्य=निर्+ईक्ष्+क्त्वा>ल्यप्। व्याहार्षीत्=वि+आङ्+हृ+लुङ्+तिप्।

**विशेषः –** अत्र शिववीरस्य कूटनीतिनिपुणत्वं सूच्यते।

**सरलार्थः –** तन्निशम्य विविधभावैः देदीप्यमानवदनः योगिराजः मुनिराजं तच्छिष्यान् च सम्यग् निरीक्ष्य तेषामपि शिववीरसाहाय्यतत्परत्वं मुनिवेषव्याजेन च सनातनधर्मरक्षातत्परत्वञ्च विज्ञाय 'शिववीरःविजयतु, भवतां मनोरथाः सफलाः भवन्तु इति मन्दम् अवोचत्।

**मूलम् – अथ 'किमपि पिपृच्छिषामी" ति शनैरभिधाय बद्धकरसम्पुटे सोत्कण्ठे जटिलमुनौ "अवगतम् यवनयुद्धे विजय एव, दैवादापद्ग्रस्तोऽपि च सखि– साहाय्येनात्मानमुद्धरिष्यति" इति समभाणीत्। मुनिश्च 'गृहीतमि'– त्युदीर्य, पुनः किञ्चिद् विचार्यैव स्मृत्वेव च, दीर्घमुष्णं निःश्वस्य, रोरुध्यमानैरपि**

**किञ्चिदुद्गतैर्वाष्पबिन्दुभिराकुलनयनो "भगवन्! प्रायो दुर्लभो युष्मादृक्षाणां साक्षात्कारः इत्यपराऽपि पृच्छाऽऽच्छादयति माम्" इति न्यवेदीत्। स च "आम्! ऊरीकृतम् जीवति सः, सुखेनैवाऽऽस्ते" इत्युदतीतरत्। अथ "तं कदा द्रक्ष्यामि" इति पुनः पृष्टवति "तद्विवाहसमये द्रक्ष्यसि" इत्यभिधाय, बहूनि सान्त्वनावचनानि च गम्भीरस्वरेणोक्त्वा, सपदि उपत्यकाम्, गण्डशैलान् अधित्यकाञ्चारूह्य पुनस्तस्मिन्नेव पर्वतकन्दरे तपस्तप्तुं जगाम।**

**प्रसङ्गः** – अत्र कविः ब्रह्मचारिगुरुणा जिज्ञासितं शिववीरविषयकं भाविनं वृत्तं तपोबलेन संसूच्य योगिराजस्य पुनः तपश्चरणाय गमनं वर्णयति।

**व्याख्या** – अथ=तदनन्तरम्, "किमपि=किञ्चिदपि, पिपृच्छिषामि= प्रष्टुमिच्छामि," इति=एवम्, शनै=मन्दम्, अभिधाय= उक्त्वा, बद्धकरपुटे=बद्धाञ्जलौ, सोत्कण्ठे=उत्कण्ठिते, जटिलमुनौ=ब्रह्मचारिगुरौ, "अवगतम्=ज्ञातम्, यवनयुद्धे= म्लेच्छैः सह संग्रामे, विजय एव=जय एव (भविष्यति), च, दैवाद्=दुर्योगात्, आपद्ग्रस्तः=विपद्ग्रस्तः, अपि सखिसाहाय्येन= मित्रसहायतया, आत्मानम्=स्वम्, उद्धरिष्यति=उद्धारं करिष्यति "इति=एवम्, समभाणीत्=समवदत्! मुनिः=बह्मचारिगुरुः, च, गृहीतम्=अवबुद्धम् इति=एवम्, उदीर्य=उक्त्वा, पुनः=भूयः, किञ्चित्=किमपि, विचार्य=विचिन्त्य, इव, स्मृत्वा= स्मरणं कृत्वा, इव च, दीर्घम्= अधिककालिकम्, उष्णम्=उष्णतापूर्णम्, च निःश्वस्य=श्वसनं विधाय, रोरुध्यमानैः=पुनः पुनः निवार्यमाणैः, अपि, किञ्चिदुद्गतैः=ईषन्निर्गतैः, वाष्पबिन्दुभिः=अश्रुकणैः, आकुलनयनः= व्यग्रनेत्रः (सन्), "भगवन्!=महात्मन्! युष्मादृक्षाणाम्= भवादृशानाम्, साक्षात्कारः=दर्शनम्, प्रायः=सामान्यतः, दुर्लभः=दुष्प्राप्यः (भवति), इति,=अतः, अपराऽपि=अन्याऽपि, पृच्छा=प्रश्नः, माम्=आचार्यम् आच्छादयति=आवृणोति, इति=एवम्, न्यवेदीत्=निवेदनमकार्षीत्। सः=योगिराजः, च, आम्=स्वीकारेऽव्ययम्! उररीकृतम्=स्वीकृतम्, सः=पुरुषविशेषः, एव, आस्ते=विद्यते "इति=इत्थम् उदतीतरत्= उत्तरं दतवान्। अथ=अनन्तरम्, "तम्=पुरुषविशेषम् कदा=कस्मिन काले, द्रक्ष्यामि=अवलोकयिष्यामि, इति=एवम्, पुनः=भूयः, पृष्टवति= प्रश्नं कृतवति, "तद्विवाहसमये= तत्परिणयावसरे, द्रक्ष्यसि= विलोकयिष्यसि, इति=इत्थम्, अभिधाय=उक्त्वा बहूनि=अनेकानि, सान्त्वनावचनानि=आश्वासनवचांसि, च, गम्भीरस्वरेण= गभीरवाचा, उक्त्वा= कथयित्वा, सपदि= शीघ्रमेव, उपत्यकाम्= अद्रेःआसन्नां भूमिम्, गण्डशैलान्= पर्वतपतितान् स्थूलपाषाणान् अधित्यकाम्= पर्वतोपरिभागम्, च, आरुह्य=आरोहणं कृत्वा, पुनः=भूयः, तस्मिन्नेव=पूर्वोक्ते, पर्वतकन्दरे=गिरिगह्वरे, तपस्तप्तुम्= तपश्चरणाय, जगाम=ययौ।

**समासविग्रहाः** – करयोः सम्पुटः करसम्पुटः (ष.त.), बद्धः करसम्पुटः येन सः (बहु), तस्मिन्। उत्कण्ठया सह सोत्कण्ठः (बहु.) तस्मिन्। जटिलश्चासौ मुनिः जटिलमुनिः (कर्म.) तस्मिन्। आपद्भिःग्रस्तः आपद्ग्रस्तः (तृ.त.)। वाष्पाणां बिन्दुः वाष्पबिन्दुः (ष.त.), तैः। आकुले नयने यस्य सः (बहु.) आकुलनयनः। गम्भीरश्चासौ स्वरः गम्भीरस्वरः (कर्म.), तेन। पर्वतस्य कन्दरः पर्वतकन्दरः (ष.त.), तस्मिन्।

**व्याकरणम्** – प्रष्टुमिच्छामि पिपृच्छिषामि–प्रच्छ्+सन्+लट्+मिप्। अभिधाय–अभि+ धा+क्त्वा+ल्यप्। अवगतम्–अव+गम्+क्त+सु। विजयः वि+जि+अच्+सु। उद्धरिष्यति–उद्+हृ+लृट्+तिप्। समभाणीत्–सम्+भण्+ लुङ्+तिप्। उदीर्य–उद्+ईर्+क्त्वा > ल्यप्। स्मृत्वा–स्मृ+क्त्वा। रोरुध्यमानैः=रुध्+यङ्+शानच्+भिस्। उद्गतैः–उद्+गम्+क्त+भिस्। पृच्छा–प्रच्छ+अङ्+टाप्+सु। पृष्टवति प्रच्छ+क्तवतु+ङि। न्यवेदीत्–नि+विद्+लुङ्+तिप्।तप्तुम्–तप्+तुमुन्।

**विशेषः** – योगिनो योगबलादनागतमपि पश्यन्तीति सूच्यते। दीर्घमुष्णं.........नयनः "इत्यत्र निर्वेदाख्यो

भावोऽभिव्यज्यते। विचार्य्येव, स्मृत्वेव' चेत्यत्र उत्प्रेक्षालंकारः।

**सरलार्थः –** तदनन्तरम् अहं किमपि प्रष्टुमिच्छामि 'इति शनैः उक्त्वा जटिलः मुनिः उत्सुकतया हस्तौ बद्ध्वा योगिराजः अवदत्–' मया विज्ञातम्, यवनैः सह युद्धे विजयो भविष्यति। दैवाद् विपद्ग्रस्तोऽपि स मित्राणां सहायतया आत्मानं रक्षिष्यति। मुनिरपि 'अवबुद्धम्' इत्युक्त्वा पुनः किञ्चिद् विचार्य इव स्मृत्वा इव च दीर्घम् उष्णं च निश्वासं कृत्वा सततं निरुध्यमानैरपि किञ्चिद् निर्गतैः अश्रुभिः पूरितनयनः (सन्) अवदत्–भगवन्! भवादृशानां महात्मनां दर्शनं दुर्लभमेव भवति। अतः एका अन्या जिज्ञासा मां प्रेरयति। योगिराजः उत्तरमददात्–आम्, विदितम्, स जीवति, सुखेन च अस्ति' ततश्च' तस्य दर्शनं कदा भविष्यति' इति पृष्टवति 'मयि तद्दर्शनं तद्विवाहकाले भविष्यति' इत्युक्त्वा गम्भीरेण स्वरेण सान्त्वनावचनम् उक्त्वा योगिराजः सत्वरम् उपत्यकां गण्डशैलान् अधित्यकाञ्च आरुह्य तस्मिन् एवं पर्वतकन्दरे तपश्चरितुं जगाम।

**मूलम् – ततः शनैः शनैर्यातेष्वपरिचितजनेषु, संवृत्ते च निर्मक्षिके, मुनिगौरबटुमाहूय, विजयपुराधीशाऽऽज्ञया शिववीरेण सह योदधुं ससेनं प्रस्थितस्य अपजलखानस्य विषये यावत् किमपि प्रष्टुमियेष, तावत् पादचारध्वनिमिव कस्याप्यश्रौषीत्। तमवधार्याऽन्यमनस्के इव मुनौ गौरवटुरपि तेनैव ध्वनिना कर्णयोराकृष्ट इव समुत्थाय, निपुणं परितो निरीक्ष्य, पर्य्यट्य, 'कोऽयम्?' इति च साम्रेडं व्याहृत्य, कमप्यनवलोक्य, पुनर्निवृत्य, 'मन्ये मार्जारः कोऽपि' इति मन्दं गुरवे निवेद्य, पुनस्तथैवोपविवेश। मुनिश्च 'मा स्म कश्चिदितरः श्रौषीत्' इति सशङ्कः क्षणं विरम्य पुनरुपन्यस्तुमारेभे।**

**प्रसङ्गः –** अत्र ब्रह्मचारिगुरुः गौरवटोः सकाशाद् अपजलखान–विषये ज्ञातुमुपक्रमते–

**व्याख्या –** ततः योगिराजगमनानन्तरम्, शनैः शनैः=मन्दं मन्दम्, अपरिचितजनेषु= उपस्थिताज्ञातमानवेषु, निर्यातेषु=गतेषु, निर्मक्षिके=जनरहिते, च, सम्वृत्ते=जाते, मुनिः=आचार्यः, गौरवटुम्=एतदाख्यं ब्रह्मचारिणम्, आहूय=आमन्त्र्य, विजयपुराधीशाऽऽज्ञया=विजयपुरेशाज्ञया, शिववीरेण= महाराष्ट्राधिपतिना, सह=साकम्, योद्धुं=युद्धार्थम् ससेनं=सबलम्, प्रस्थितस्य=प्रस्थानं कृतवतः, अपजलखानस्य=एतदाख्यस्य सेनापतेः, विषये=सम्बन्धे, यावत्=यदा किमपि=किञ्चित्, प्रष्टुं=प्रज्ञातुम्, इयेष= इच्छितवान्, तावत्=तदेव, कस्यापि= अज्ञातजनस्य, पादचारध्वनिमिव= चरणोद्भूतरवम् इव, अश्रौषीत्=अशृणोत्,। तं= ध्वनिम् अवधार्य=ज्ञात्वा, अन्यमनस्के=खिन्ने, इव, मुनौ=गुरौ, (सति), गौरवटुरपि=गौरब्रह्मचारी अपि, तेनैव=पूर्वश्रुतेनैव, ध्वनिना=शब्देन, कर्णयोः=श्रोत्रयोः, आकृष्ट इव=कृष्ट इव, समुत्थाय=उत्थितो भूत्वा, परितः=समन्तात्, निरीक्ष्य=सम्यक् दृष्ट्वा, पर्य्यट्य=परिभ्रम्य, कोऽयम्=एष कः (अत्र विद्यते), इति= एवम्, साम्रेडं=वारं वारम्, व्याहृत्य=उक्त्वा, कमपि=कञ्चिदपि, (जनम्), अनवलोक्य=अदृष्ट्वा, पुनः=भूयः, निवृत्य=प्रत्यागम्य मन्ये=जाने, कोऽपि=कश्चन, मार्जारः=बिडालः, इति=एवम्, मन्दं मन्दम्=शनैः शनैः, गुरवे=आचार्याय, निवेद्य=निवेदनं कृत्वा, पुनः=भूयः तथैव=पूर्ववत् उपविवेश=उपाविशत्, मुनिः=आचार्यः, च, कश्चिदितरः=कोऽपि अन्यः, मा स्म श्रौषीत्=न शृणुयात्, इति=अस्मात्, सशङ्कः=शंकितः (सन्), क्षणं=कश्चित्कालम्, विरम्य=विरामं कृत्वा, पुनः=भूयः, उपन्यस्तुं=कथयितुम्, आरेभे=आरभत।

**समासविग्रहाः –** न परिचितः अपरिचितः (नञ् त.) अपरिचितश्चासौ जनः (कर्मः) तेषु। मक्षिकाणामभावो निर्मक्षिकम् (अव्ययीभावः) तस्मिन्। पादचारस्य ध्वनिः पादचारध्वनिः (ष.त.) तम्। अन्यस्मिन् मनो यस्य सः अन्यमनस्कः (बहु.) तस्मिन्।

**व्याकरणम् –** निर्यातेषु=निर्+या+क्त+सुप्। सम्वृत्ते–सम्+वृत्+क्व+ङि। योद्धुम्– युध्+तुमुन्। प्रस्थितस्य–प्र+स्था+क्त+ड.स्। इयेष–इष्+लिट्+तिप्। अवधार्य–अव+धृ+णिच्+क्त्वा > ल्यप्।

समुत्थाय–सम्+उद्+स्था+क्त्वा > ल्यप्। पर्य्यट्य–परि+अट्+क्त्वा+ल्यप् व्याहृत्य–वि+आङ्+हृ+क्त्वा >ल्यप्। अनवलोक्य नञ्+अव+लोक्+क्त्वा > ल्यप्। उपन्यस्तुम् उप+नि+ अस्+तुमुन्। आरेभे–आ+रभ्+लिट्+तिप्।

**विशेषः** – गद्येऽस्मिन् आगमिष्यता विघ्नेन सावधानेन भाव्यम् इति सूच्यते। 'अन्यमनस्के इव' इत्यत्र 'मन्ये मार्जारः' इत्यत्र चोत्प्रेक्षा।

**सरलार्थः** – ततः शनैः शनैः गतेषु अपरिचितजनेषु निर्जने सति आचार्यः गौरवटुमाहूय विजयपुराधिपाज्ञया शिववीरेण सह योद्धुं ससेनं प्रस्थितस्य अफजलखानस्य विषये किञ्चित् प्रष्टुमिच्छति स्म, तावत् कस्यापि पादचारध्वनिमिव शृणोति स्म। तच्छ्रुत्वा खिन्ने इव मुनौ गौरवटुः तद्ध्वनेः कारणं ज्ञातुं परितः सम्यक् पश्यति भ्रमति च ततश्च पुनः पुनः अयं कः? अयं कः? इत्युक्त्वा कमपि अनवलोक्य पुनः प्रत्यागत्य गुरवे ''प्रतीयते कश्चन मार्जारोऽस्ति'' इति मन्दं निवेद्य पुनः पूर्ववदुपाविशत् मुनिश्च–''कश्चिदन्यः न शृणुयाद्'' इत्याशक्य क्षणं विरम्य पुनः वक्तुमारभत।

**मूलम् – ''वत्स गौरसिंह! अहमत्यन्तं तुष्यामि त्वयि, यत्त्वमेकाकी अफजलखानस्य त्रीनश्वान् तेन दासीकृतान् पञ्चब्राह्मणतनयांश्च मोचयित्वा आनीतवानसीति। कथं न भवेरीदृशः ? कुलमेवेदृशं राजपुत्रदेशीयक्षत्रियाणाम्। तावत् पुनरश्रूयत मर्मरः पादक्षेपश्च। ततो विरम्य, मुनिः स्वयमुत्थाय, प्रोच्चं शिलापीठमेकमारुह्य, निपुणतया परितः पश्यन्नपि कारणं किमपि नावलोकयामास चरणाक्षेपशब्दस्य। अतः पुनरेकतानेन निपुणं निरीक्षमाणेन गौरसिंहेन दृष्टम् यत् कुटीरनिकटस्थनिष्कुटकदलीकूटे द्वित्रास्तरवोऽतितरां कम्पन्ते इति।**

**प्रसङ्गः** – अत्र आचार्यः गौरवटुं किमपि वक्तुमिच्छति तावदेव पुनः पादचारध्वनिं श्रुत्वा उभावपि तत्कारणम् अन्वेष्टुं तत्परौ भवतः–

**व्याख्या** – वत्स गौरसिंह!=पुत्र गौरसिंह!, अहम्=आचार्यः, त्वयि=भवति, अत्यन्तम्=नितराम्, तुष्यामि=प्रसीदामि, यत्=यतोहि, त्वम्=भवान्, एकाकी=एक एव, अफजलखानस्य=एतदाख्यस्य यवनसेनानायकस्य, त्रीन् अश्वान्=त्रीन् तुरगान्, तेन=अफजलखानेन, दासीकृतान्=बन्दीकृतान् पञ्च ब्राह्मणतनयान्=पञ्च विप्रपुत्रान्, च, मोचयित्वा=मुक्तान् कारयित्वा, आनीतवानसि=आनयत्, इति। ईदृशः=एतादृशः, कथम्=केन प्रकारेण, न=नैव। भवेः=स्याः ? (यतः) राजपुत्रदेशीयक्षत्रियाणाम्= राजपुत्रदेशोद्भवराजन्यानाम्, कुलम्=वंशः, एव=हि, ईदृशम्=एतादृशम् (भवतीति शेषः)'' तावत्=तदैव, पुनः=भूयः, मर्मरः=मर्मरेति अव्यक्तो ध्वनिः, च, पादक्षेपः=चरणनिक्षेपः अश्रूयत=श्रुतः। ततः=तदनन्तरम्, विरम्य=स्थित्वा, मुनिः=गुरुः, स्वयम्=स्वयमेव, उत्थाय=उत्थानं कृत्वा, एकम्, प्रोच्चम्=अत्युच्चम् शिलापीठम्=गण्डशैलम्, आरुह्य=आरोहणं कृत्वा, निपुणतया=सम्यक्तया, पश्यन्नपि=अवलोकयन्नपि, चरणक्षेपशब्दस्य= पादनिक्षेपध्वनेः, किमपि=किञ्चिदपि, कारणम्=हेतुम्, न अवलोकयामास=न ददर्श। अतः=अस्मात् कारणात्, पुनः=भूयः, एकतानेन=एकाग्रेण मनसा, निपुणम्=सम्यक् निरीक्षमाणेन=पश्यता गौरसिंहेन=गौरवटुना दृष्टम्=विलोकितम्। यत्, कुटीरनिकटस्थनिष्कुटकदलीकूटे= पत्रोटजसमीपस्थगृहारामकदलीकूटे, द्वित्राः=द्वौ त्रयो वा, तरवः=वृक्षाः अतितराम्=अतीव, कम्पन्ते=धुन्वन्ति इति।'

**समासविग्रहाः** – ब्राह्मणस्य तनयाः ब्राह्मणतनयाः (ष.त.) तान्। राजपुत्रदेशे भवाः राजपुत्रदेशीयाः ते च क्षत्रियाः राजपुत्रदेशीयक्षत्रियाः (कर्म.) तेषाम्। निकटे तिष्ठतीति निकटस्थः, कुटीरस्य निकटस्थः (ष.

त.) कुटीरनिकटस्थश्चासौ निष्कुटः कुटीरनिकटस्थनिष्कुटः (कर्म.) कदलीनां कूटः कदलीकूटः कुटीरनिकटस्थनिष्कुटे कदलीकूटः (स.त.) तस्मिन्। चरणयोः आक्षेपः (ष.त.) तस्य शब्दः, तस्य।

**व्याकरणम्–** दासीकृतान्–अदासा दासाः कृताः, तान् दास+च्वि+कृ+ क्त+शस्। मोचयित्वा=मुच्+णिच्+क्त्वा। आनीतवान्=आङ.+नी+क्तवतु+सु। विरम्य–वि+रम्ःक्त्वा+ल्यप्। उत्थाय=उद्+स्था+क्त्वा+ल्यप्। आरुह्य–आङ.+रुह्+क्त्वा+ल्यप्। पश्यन्–दृश्+शतृ+सु। निरीक्षमाणेन–निर्+ईक्ष् शानच्+टा। दृष्टम्–दृश्+क्त+सु।

**विशेषः –** अत्र राजपुत्रदेशोत्पन्नानां क्षत्रियाणां सामर्थ्यं शिववीरस्य सहायकानाञ्च निपुणत्वं सूच्येते। अत्र अप्रस्तुतानां राजपुत्राणां शौर्यवर्णनेन प्रस्तुतस्य गौरसिंहस्य शौर्यमभिव्यज्यते। तस्मादत्र अप्रस्तुतप्रशंसाऽलंकारः।

**सरलार्थः –** ''पुत्र! गौरसिंह। अहं त्वयि प्रसीदामि यत् त्वमेक एव अफजलखानस्य त्रीन् अश्वान् तेन दासीकृतान् पञ्चब्राह्मणपुत्रान् मोचयित्वा आनीतवान् असि। त्वमेतादृशः कथं न भवेः? यतोहि राजपुत्रदेशे समुत्पन्नानां क्षत्रियाणां कुलमेवेदशं भवति। तदैव पुनः मर्मरध्वनिः पदक्षेपश्च श्रूयेते। ततो विरम्य मुनिः स्वयमेव उत्थाय एकं प्रोच्चं शिलाखण्डमारुह्य निपुणतया परितः पश्यन्नपि पादध्वनेः किम् अपि कारणं न ददर्श। अतः पुनः सावधानमनसा निपुणं पश्यता गौरसिंहेन दृष्टं यत् कुटीरसमीपस्थे निष्कुटकदलीगुल्मे द्वित्रा वृक्षाः अतीव कम्पन्ते इति।

**मूलम् – तदेव संशयस्थानमित्यङ्गुल्या निर्दिश्य कुटीरवलीके गोपयित्वा स्थापितानामसीनामेकमाकृष्य, रिक्तहस्तेनैव मुनिना पृष्ठतोऽनुगम्यमानः, कपोलतलविलम्बमानान् चक्षुश्चुम्बिनः, कुटिलकचान् वामकराङ्गुलिभिरपसारयन्, मुनिवेषोऽपि किञ्चित् कोपकषायितनयनः, करकम्पितकृपाकृपणकृपाणो महादेव– माराधयिषुस्तपस्विवेषोऽर्जुन इव शान्तवीररसद्वयस्नातः सपदि समागतवान् तन्निकटे, अपश्यच्च लता–प्रतान–वितान–वेष्टित–रम्भा–स्तम्भा–त्रितयस्य मध्ये नीलवस्त्रखण्डवेष्टितमूर्द्धानं हरितकञ्चुकं श्यामवसनानद्धकटितट– कर्बुराधोवसनम् काकासनेनोपविष्टम्, रम्भालवाललग्नाधोमुखखड्गत्सरुन्यस्तविपर्यस्त हस्तयुगलम्, लशुनगन्धिभिर्निश्वासैः कदलीकिसलयानि मलिनयन्तम्, नवाङ्कुरितश्मश्रुश्रेणिच्छलेन कन्यकापहरणपङ्ककलङ्किताननम् विंशतिवर्षकल्पं यवनयुवकम्। ततः परस्परं चाक्षुष सम्पन्ने दृष्टोऽहमिति निश्चित्य, उत्प्लुत्य, कोशात् कृपाणमाकृष्य, युयुत्सुः सोऽपि सम्मुखमवतस्थे। ततस्तयोरेव सञ्जाताः परस्परमालापाः।**

**प्रसङ्गः –** गद्येऽस्मिन् निपुणं निरीक्ष्यमाणो गौरसिंहः शाखाशाखिषु निलीनं यवनयुवकं पश्यति इत्यस्य वर्णनं कुर्वन् कविराह।

**व्याख्या –** तदेव=अद एव, संशयस्थानम्=संदेहास्पदम् इति=एवम्, अङ.गुल्या= करशाखया, निर्दिश्य= निर्देशं कृत्वा, कुटीरवलीके= उटजाच्छादने, गोपयित्वा= संगोप्य, स्थापितानाम्= सुरक्षितानाम्, असीनाम्= कृपाणानाम् एकम्= अन्यतमम्, आकृष्य= नीत्वा रिक्तहस्तेन= शून्यपाणिना एव मुनिना= आचार्येण पृष्ठतः=पृष्ठभागतः, अनुगम्यमानः= अनुसर्यमाणः, कपोलतलविलम्बमानान्= गण्डस्थललम्बमानान्, चक्षुश्चुम्बिनः= लोचनस्पर्शिनः, कुटिलकचान्=वक्रकेशान्, अपसारयन्=दूरीकुर्वन्, मुनिवेषोऽपि= तापसवेशोऽपि, किञ्चित्=ईषत्, कोपकषायितनयनः= क्रोधकलुषितनेत्रः, करकम्पितकृपाकृपणकृपाणः= हस्तोद्वोजितनिर्दयखड्गः, महादेवम्=शिवम्, आराधयिषुः= आराधयितुमिच्छुः, तपस्विवेषः=मुनिस्वरूपः, अर्जुन इव=पार्थ इव, शान्तवीररसद्वयस्नातः= शान्तवीररसद्वयाभिषिक्तः (गौरसिंहः) सपदि=शीघ्रमेव,

तन्निकटे=तत्समीपे, समागतवान्=समागच्छत्, लता–प्रतान–वितानवेष्टित–रम्भा–स्तम्भ–त्रितयस्य= वल्ली–तन्तु–विस्तार–वलयित–कदलीस्तम्भत्रयस्य, मध्ये=अभ्यन्तरे, नीलवस्त्रखण्डवेष्टितमूर्द्धानम्= असितवसनाञ्चलवलयितमस्तकम्, हरितकञ्चुकम्= हरितचोलकम्, श्यामवसनानद्धकटितटकर्बुराधोवसनम् =श्यामलवस्त्रबद्धशब लाधोवस्त्रम्, काकासनेन=वायसासनेन, उपविष्टम्=संस्थितम्, रम्भालबाल–लग्नाधोमुखखड्गत्सरुन्यस्तविपर्यस्तहस्तयुगलम्= कदल्यावालस्थापित– निम्नानन– कृपाणमुष्टि स्थापितविपरीतकरयुगम्, लशुनगन्धिभिः= रसोनगन्धपूर्णैः, निःश्वासैः=श्वासैः कदलीकिसलयानि=रम्भादलानि, मलिनयन्तम्= मलिनीकुर्वन्तम्, नवाङ्कुरितश्मश्रुश्रेणिच्छलेन =अभिनवाङ्कुरित–कूर्चपंक्तिव्याजेन, कन्यकापहरणपङ्कलङ्कलङ्किताननम्= कन्याहरणकर्दमलाञ्छन लाञ्छितवदनम्, विंशतिवर्षकल्पम् =विंशतिवर्षदेशीयम्, यवनयुवकम्= म्लेच्छयुवानम् अपश्यत्= व्यलोकयत् ततः=तदनन्तरम्, परस्परम्=अन्योन्यम्, चाक्षुषे=नेत्रप्रत्यक्षे, सम्पन्ने=जाते, अहम्=यवनयुवकः, दृष्टः=विलोकितः, इति=एवम्, निश्चित्य=निश्चयं कृत्वा, उत्प्लुत्य=उत्पत्य, कोशात्=खड्गपिधानकात्, कृपाणम्=खड्गम्, आकृष्य=बहिः निस्सार्य, युयुत्सुः=योद्धुमिच्छुः, सोऽपि= यवनोऽपि, सम्मुखम्=प्रत्यक्षम्, अवतस्थे=स्थितोऽभूत्। ततः=तदनन्तरम्, तयोः=गौरसिंह–यवनयुवकयोः, परस्परम्=मिथः, एवम्=वक्ष्यमाण प्रकारेण, आलापाः=संलापाः, संजाताः=अभूवन्।

**समासविग्रहाः –** कपोलतले विलम्बमानाः (स.त.) तान्। कुटिलाः कचाः कुटिलकचाः (कर्म.), तान्। कोपेन कषायिते नयने यस्य सः (बहुव्रीहिः)। कृपायां कृपणः कृपाकृपणः,(स.त.), स चासौ कृपाणः (कर्म.) कृपाकृपणकृपाणः, कम्पितः चासौ कृपाकृपणकृपाणः कम्पितकृपाकृपणकृपाणः (कर्मः) करे कम्पितकृपा–कृपणकृपाणः यस्य सः (बहु.)। लतानां प्रतानानि (ष.त.), तेषां वितानम्, तेन वेष्टितम् (तृ.त.) लताप्रतानवितानवेष्टितम् रम्भास्तम्भानां त्रितयम् रम्भास्तम्भत्रितयम् लतावितानवेष्टितम् च तत् लताप्रतानवितानवेष्टितरम्भास्तम्भत्रितयम् (कर्म.), तस्य। नीलं च तत् वस्त्रखण्डञ्च नीलवस्त्रखण्डम् (कर्म.), तेन वेष्टितो मूर्धा यस्य सः (बहु.), तम्। श्यामवसनेन आनद्धं कटितटम् इति श्यामवसनानद्धकटितटम् (कर्म), कर्बुरम् अधोवसनम् कर्बुराधोवसनम् (कर्म.) श्यामवसनानद्धकटितटे कर्बुराधोवसनं यस्य सः (बहु.), तम्। रम्भाया आलबालम् रम्भालबालम् (ष.त.), अधोमुखश्चासौ खड्गः अधोमुखखड्गः (कर्मः) लग्नश्चासौ अधोमुखखड्गः लग्नाधोमुखखड्गः (कर्मः) रम्भालबाले लग्नाधोमुखखड्गः (स.त.) तस्य त्सरुः (ष.त.) विपर्यस्तं च तद् हस्तयुगलम् (कर्म.) रम्भालबाललग्नाधोमुखखड्गत्सरौ म्यस्तं विपर्यस्तहस्तयुगलं येन सः (बहु.), तम्।

**व्याकरणम् –** निर्दिश्य–निर्+दिश्+क्त्वा > ल्यप्। गोपयित्वा – गुप्+णिच्+क्त्वा। अनुगम्यमानः – अनु+गम्+शानच्+सु। अपसारयन् – अप+सृ+णिच्+ शतृ+सु। आराधयिषुः – आङ्+राध्+सन्+उ+सु। उत्प्लुत्य – उद्+प्लुङ्+ क्त्वा > ल्यप्। युयुत्सुः – युध्+सन्+उ+सु। अवतस्थे – अव+स्था+ लिट्+तिप्।

**विशेषः –** गद्येऽस्मिन् तदानीमाश्रमवासिनः तपस्विनोऽपि यवनदुराचारेभ्यः देशं धर्मञ्च रक्षितुं तत्परा आसन् इति सूच्यते। अत्र कृपाणधारणात् साधुवेषाच्च गौरसिंह वीरशान्तरसयोः प्रतीत्या उत्प्रेक्षा व्यज्यते। 'अर्जुन इव' इत्यत्र उपमा अलंकारः। अनुप्रासस्तु प्रायशः दृश्यते। 'नवाङ्कुरित........................ कलङ्किताननमित्यत्र रूपकोत्प्रेक्षे।

**सरलार्थः –** 'तदेव संशयस्थानमस्ति' इति अंगुल्या निर्दिश्य कुटीरपटलप्रान्ते गोपायित्वा स्थापितानां खड्गानाम् एकं निस्सार्य रिक्तहस्तेन गुरुणा अनुगम्यमानो गौरसिंहः सत्वरमेव तत्र गच्छति लताप्रतानवितानेन

वेष्टितस्य कदलीस्तम्भत्रयस्य मध्ये अन्तर्हितं विंशतिवर्षदेशीयं यवनयुवानं च पश्यति। तत्र गमनकाले गौरसिंहः कपोलतललम्बमानान् नेत्रस्पर्शिनः कुटिलकेशान् सव्यहस्तांगुलिभिः दूरीकुर्वन्, मुनिवेषोऽपि किञ्चित् क्रोधरक्तनेत्रः, करकम्पितनिर्दयखड्गः महादेवम् आराधयितुमिच्छुः तापसवेषोऽर्जुन इव प्रतीयमानः (अत एव) शान्तवीररसाभ्यां स्नात इव आसीत्। यवनयुवकश्च नीलवस्त्राञ्चलवेष्टितमस्तकः धृतहरितचोलकः, श्यामवस्त्रबद्धकटितटः कर्बुराधोवसनः काकासनेन उपविष्ट आसीत्; स च रम्भालवाले संस्थापितस्य खड्गस्य मुष्ट्यां संस्थापितविपरीतहस्तः आसीत्, लशुनगन्धिभिः निःश्वासैः कदलीदलानि मलिनीकुर्वन् आसीत्, नवोत्पन्नश्मश्रुलोम्नां छलेन कन्यकापहरणकलङ्केन कलङ्कितानन इवासीत्। यथैव गौरसिंहस्तं पश्यति; 'अहं दृष्ट' इति निश्चित्य उत्फालनं कृत्वा कोशात् खड्गम् आकृष्य योद्धुम् इच्छुः सः यवनहतकः सम्मुखं स्थितो भवति। ततश्च तयोः वक्ष्यमाणप्रकारेण संलापा अभूवन्।

**मूलम् – गौरसिंह :– कुतो रे यवनकुलकलङ्क ?**

**यवन–युवकः – आः! वयमपि कुत इति प्रष्टव्याः? भारतीय– कन्दरिकन्दरेष्वपि वयं विचरामः, शृंग–लाङ्गूलविहीनानां हिन्दुपदव्यवहार्याणाञ्च युष्मादृक्षाणां पशूनामाखेटक्रीडया रमामहे।**

**गौरसिंहः – (सकोधं विहस्य) वयमपि स्वाङ्कागतसत्ववृत्तयः शिवस्य गणा–अत्रैव निवसामः, तत् सुप्रभातमद्य स्वयमेव त्वं दीर्घ–दावदहने पतङ्गायितोऽसि।**

**यवन–युवकः – अरे रे वाचाल! ह्यो रात्रौ युष्मत्कुटीरे रुदतीं समायातां ब्राह्मणतनयां सपदि प्रयच्छथ, तत् कदाचिद दयया जीवतोऽपि त्यजेयम्, अन्यथा मदसिभुजङ्गिन्या दंष्टाः क्षणात् कथावशेषाः संवर्त्स्यथ।**

**प्रसङ्गः** – अत्र कविः परस्परं दृष्टवतोः गौरसिंह–यवन–युवकयोः वार्तालापं वर्णयति

**व्याख्याः** – गौरसिंहः, रे=अरे, यवनकुलकलङ्क!=म्लेच्छवंशलाञ्छन!:, कुतः=कस्मात् स्थानात् आगतोऽसीति शेषः? यवनयुवकः–आः!=क्रोधसूचकं सम्बोधनम्, वयम्=यवनाः, अपि, कुत इति=कस्मादिति, प्रष्टव्याः=प्रष्टुं योग्याः स्मः? न प्रष्टव्याः इत्यर्थः। भारतीयकन्दरिकन्दरेषु अपि=भारतदेशीयपर्वतगह्वरेषु अपि, वयम्=यवनाः, विचरामः=भ्रमामः, शृङ्गलाङ्गूलविहीनानाम्= विषाणपुच्छ– रहितानाम्, हिन्दुपदव्यवहार्याणाम्=भवादृशानाम्, पशूनाम्=पशूभूतानाम्, आखेटक्रीडया=मृगयाखेलया, रमामहे=मनोरञ्जनं कुर्मः। गौरसिंहः– (सक्रोधम्=सकोपम्, विहस्य=उपहस्यं) स्वाङ्कागतसत्ववृत्तयः=निजक्रोडागत प्राणिभोजनाः, शिवस्य=शङ्करस्य, गणाः=सेवकाः वयमपि=आश्रमनिवासिनोऽपि, निवसामः=वसामः। तत्=तस्मात्, अद्य=अस्मिन् दिने, सुप्रभातम्=शोभनः दिवसारम्भः (अस्ति), त्वम्=यवनकलङ्कः, स्वयमेव=आत्मना एव, दीर्घदावदहने=तीव्रदावानले, पतङ्गायितः असि=पतङ्गमिवाचरसि। यवनयुवकः – अरे रे वाचाल!=हे बहुभाषणशील!, ह्यः, रात्रौ=गतायां रजन्याम्, युष्मत्कुटीरे=भवदुटजे, रुदतीम्=विलपन्तीम्, समायाताम्= समागताम्, ब्राह्मणतनयाम्=विप्रकन्याम्, सपदि=शीघ्रम्, प्रयच्छथ=दत्थ, तदा=तस्मात्, कदाचिद्=केनापि प्रकारेण, दयया=अनुकम्पया, जीवतः अपि=सुरक्षितजीवनान् अपि, त्यजेयम्=मुञ्चेयम्, अन्यथा=नो चेत्, मदसिभुजङ्गिन्या= मत्करवालसर्पिण्या दंष्टा=दशनं प्राप्ताः, क्षणात्=अल्पेन कालेन, कथावशेषाः=नाममात्रशेषाः (मृताः), संवर्त्स्यथ=भविष्यथ।

**समासविग्रहाः** – भारतीयाः कन्दरिणः भारतीयकन्दरिणः (कर्म) तेषां कन्दराः (ष.त.), तासु। शृंगं च लाङ्गूलं च (द्वन्द्वः), ताभ्यां विहीनाः, तेषाम्। स्वस्य अङ्कः स्वाङ्कः (ष.त.), स्वाङ्के आगता स्वाङ्कागताः (स.त.), ते च सत्त्वाः स्वाङ्कागतसत्त्वाः (कर्म.) स्वाङ्कागतसत्त्वाः वृत्तिर्येषां ते स्वाङ्कागतसत्त्ववृत्तयः (बहु.)।

**व्याकरणम् –** प्रष्टव्याः–प्रच्छ्+तव्य+जस्। पतङ्गायितः–पतङ्ग+क्यङ्+ क्त+सु। रुदती–रुद्+शतृ+ङीप्+सु। दंष्टाः–दंश्+क्त+जस्। संवत्स्यर्थ–सम्+ वृत्+लृट्+थ।

**विशेषः –** गद्येऽस्मिन् पतङ्गायितोऽसि' इत्यत्र लुप्तोपमालंकारः, 'मदसिभुजङ्गिन्याः' इत्यत्र रूपकम् 'कन्दरिकन्दरे' चेत्यत्र छेकानुप्रासः।

**सरलार्थः –** अत्र गौरसिंहः कथयति – रे यवनकुलकलङ्क। त्वं कुत आगतोऽसि? तदा यवनयुवक उत्तरति–वयं न प्रष्टव्याः स्मः यतोहि वयं भारतीयपर्वत– कन्दरासु विचरन्तो हिन्दुपशूनां मृगयया रमणं कुर्मः। तदाकर्ण्य गौरसिंहः विहस्य सक्रोधं निजक्रोडागतप्राणिभोजनाः शिवगणाः वयमपि अत्रैव वसाम इति ब्रूते। अद्य सुप्रभातं विद्यते यत्त्वमस्मिन् दीर्धदावानले पतङ्गमिव आत्मनाशाय आगतोऽसि। यवनयुवकः ब्रूते – रे वाचाल! गतरात्रौ युष्मत्कुटीरे रुदतीं समागतां ब्राह्मणकन्यां शीघ्रं प्रयच्छथ, तदा कदाचित् कृपया जीवितान् त्यजेयम्, नो चेद्–मदसिसर्पिण्या दंष्टाः अचिरादेव मृत्युं प्राप्स्यथ।

**मूलम् – कलकलमेतमाकर्ण्य श्यामवटुरपि कन्यासमीपादुत्थाय दृष्ट्वा च हन्तुमेतं यवनवराकं पर्याप्तोऽयं गौरसिंह इति मा स्म गमदन्योऽपि कश्चित् कन्यकामपजिहीर्षुरिति वलीकादेकं विकटखड्गमाकृष्य त्सरौ गृहीत्वा कन्यकां रक्षन् तदध्युषित–कुटीर–निकट एव तस्थौ।**

**गौरसिंहस्तु 'कुटीरान्तः कन्यकाऽस्ति, सा च यवन–वध– व्यसनिनि मयि जीवति न शक्या द्रष्टुमपि, किं नाम स्प्रष्टुम् ? तद् यावत् तव कवोष्ण–शोणित–तृषित एष चन्द्रहासो न चलति, तावत् कूर्दनं वा उत्फालं वा यच्चिकीर्षसि तद् विधेहि" इत्युक्त्वा व्यालीढमर्य्यादया सज्जः समतिष्ठत।**

**प्रसङ्गः –** अत्र गौरसिंह–यवनयुवकयोः संलापं श्रुत्वा श्यामवटुरपि सज्जो भवति; गौरसिंहश्च यवनयुवकं ब्रूतेँ

**व्याख्या –** एतत्=इदम्, कलकलम्=कोलाहलम्, आकर्ण्य=श्रुत्वा, श्यामवटुः=द्वितीयो ब्रह्मचारी,अपि, कन्यासमीपात्=बालिकापार्श्वात्, उत्थाय=समुत्थाय, एतम्=इमम्, यवनवराकम्=क्षुद्रम्लेच्छम्, हन्तुम्=वध ााय, अयम्=एषः, गौरसिंहः, पर्याप्तः=समर्थः, इति=एवम्, च, दृष्ट्वा=विचार्य अन्योऽपि=अपरोऽपि कश्चित्=कोऽपि, कन्यकाम्=कन्याम्, अपजिहीर्षुः=अपहर्तुमिच्छुः, मा स्म गमत्=न आगच्छेत् इति=एवम् (विचार्य) वलीकात्=कुटीरप्रान्तात्, एकम्, विकटखड्गम्=विशालकृपाणम्, आकृष्य=निस्सार्य, त्सरौ=मुष्टौ, गृहीत्वा=संगृह्य, कन्यकां=बालिकाम्, रक्षन्=अवन् तदध्युषितकुटीरनिकटे= तदुषितोटजसमीपे, एव, तस्थौ=स्थितोऽभूत्। गौरसिंहः, तु, "कुटीरान्तः= उटजे, कन्यका=विप्रतनया, अस्ति=विद्यते, सा=कन्या, च, यवनवधव्यसनिनि= म्लेच्छहननरसिके, मयि=गौरसिंहे, जीवति=विद्यमाने, द्रष्टुमपि= अवलोकयितुमपि, न शक्या= न क्षमा, स्प्रष्टुम्=स्पर्शं कर्तुम्, किं नाम=न कश्चित् प्रभवति इत्यर्थः। तत्=तस्मात्, यावत्=यावत्कालपर्यन्तम्, तव=भवतः, कवोष्णशोणिततृषितः= ईषदुष्णरुधिर– पिपासितः, एषः=अयम्, चन्द्रहासः=खड्गः, न चलति=न चञ्चलो भवति, तावत्=तावत्कालपर्यन्तम्, कूर्दनम्=उत्पतनम्, वा=अथवा, उत्फालम्=उत्प्लवनम्, वा, यत् चिकीर्षसि=यत् कर्तुमिच्छसि, तद्विधेहि=तत्कुरु'' इति=एवम्, उक्त्वा=कथयित्वा, व्यालीढमर्य्यादया=युद्धाय कृतावस्थानविशेषेण, सज्जः=तत्परः, समतिष्ठत= स्थितोऽभूत्।

**समासविग्रहाः –** विकटश्चासौ खड्गः विकटखड्गः (कर्म.) तम्। तया अध्युषितः तदध्युषितः (त. त.) स चासौ कुटीरः (कर्म.), तस्मिन्। यवनानाम् वधः(ष.त) तस्मिन् व्यसनं यस्य सः (बहु.), तस्मिन्। कवोष्णं च तत् शोणितम् कवोष्णशोणितम् (कर्म.), तस्य तृषितः। व्यालीढस्य मर्यादा (ष.त.) तया।

**व्याकरणम् –** आकर्ण्य–आङ्.+कर्ण्+क्त्वा ल्यप्। उत्थाय–उद्+स्था+क्त्वा ल्यप्। दृष्ट्वा–

दृश्+क्त्वा झल्यप्। हन्तुम्=हन्+तुमुन्। अपजिहीर्षुःअप+ हृ+सन्+ उ+सु। तस्थौ–स्था+लिट्+तिप्+णल्। स्प्रष्टुम्–स्पर्श्+तुमुन्। कूर्दनम्–कूर्द्+ल्युट्। चिकीर्षसि=कृ+सन्+ लट्+सिप्। समतिष्ठत–सम्+ स्था+लङ्.+त।

**विशेषः –** अत्र गौरसिंह–श्यामसिंहयोश्च शौर्यवर्णनादुत्साहप्रतीत्या सामाजिकानां वीररसोऽभिव्यज्यते।

**सरलार्थः –** इदं कोलाहलं निशम्य श्यामवटुरपि कन्यासमीपादुत्थाय इमं यवनं हन्तुं गौरसिंहः पर्याप्त इति विचार्य च अन्यः कश्चिद् कन्यामपहर्तुमिच्छुः न समागच्छेद् इति कृत्वा कुटीरप्रान्तात् एकं विकटं खडगं निष्कास्य मुष्टौ च गृहीत्वा कन्यकां रक्षन् तदुषितोटजनिकटे एव स्थितोऽभूत्।

गौरसिंहस्तु ''कन्या उटजाभ्यन्तरे वर्तते, परं यवनवधरसिके मयि विद्यमाने सा द्रष्टुमपि शक्या नास्ति, स्पर्शनस्य तु वार्तैव नास्ति। तस्माद् यावत् तव कोष्णरुधिरपिपासितोऽयं (मदीयः) खड्गः न चलति, तावत् कूर्दनं वा उत्फालं वा यत् कर्तुमिच्छसि, तत् कुरु'' इति उक्त्वा प्रहर्तुं तत्परोऽभूत्।

**मूलम् – ततो गौरसिंहः दक्षिणान् वामांश्च परश्शतान् कृपाणमार्गा– नङ्गीकृतवतः दिनकरस्पर्शचतुर्गुणीकृतचाकचक्यैः चञ्चच्चन्द्रहासचमत्कारैश्चक्षूंषि मुष्णतः, यवनयुवकहतकस्य, केनाप्यनुलक्षितोद्योगः, अकस्मादेव स्वासिना कलितक्लेदसंजातस्वेदजलजालं विशिथिलकचकुलमालं भग्नभ्रूभयानकभालं शिरश्चिच्छेद।**

**प्रसङ्गः –** अत्र गौरसिंहः सत्वरमेव यवनहतकस्य शिरश्छिनति इति वर्ण्यते –

ततः=तदा, गौरसिंहः=गौरवटुः,दक्षिणान्=अपसव्यान्, वामान्=सव्यान्, च, परश्शतान्=शताधिकान् कृपाणमार्गान्=खड्गपथान् (खड्गप्रहारान्), अङ्गीकृतवतः=स्वीकृतवतः, दिनकरकरस्पर्शचतुर्गुणीकृतचाकचक्यैः= सूर्यकिरणसम्पर्कसंवर्द्धितकान्तिविशेषैः, चञ्चच्चन्द्रहासचमत्कारैः= स्फुरत्कृपाणचमत्कारैः, चक्षूंषि=नेत्राणि, मुष्णतः=चोरयतः, यवनहतकस्य= अधमम्लेच्छस्य, कलितक्लेदसंजातस्वेदजलजालम्=व्याप्तपरिश्रमसमुत्पन्न धर्माम्बुसमूहम्, विशिथिलकचकुलमालम् =शिथिलकेश–समूहलेखम्, भग्नभ्रूभयानकभालम्= छिन्नभ्रूविकराललललाटम्, शिरः=मस्तकम्, अकस्माद् एव=सहसा एव, केनापि, अनुलक्षितोद्योगः=अदृष्टयत्नः, (सन्) चिच्छेद= चकर्त।

**समासविग्रहाः –** कृपाणस्य मार्गः कृपाणमार्गः (ष.त.) तान्। दिनकरस्य कराः, तेषां स्पर्शः दिनकरकरस्पर्शः (ष.त.) चतुर्गुणीकृतञ्च तत् चाकचक्यम् चतुर्गुणीकृतचाकचक्यम् येषां ते (बहु.)तैः। न उपलक्षितः अनुपलक्षितः (नञ् तत्पु.) अनुपलक्षितः उद्योगः यस्य स अनुपलक्षितोद्योगः (बहु.)। कलितश्चासौ क्लेदः कलितक्लेद (कर्म.) कलितक्लेदेन संजातम् कलितक्लेदसंजातम् (तृ.त.) स्वेदजलस्य जालम् स्वेदजलजालम् (ष.त) कलितक्लेदसंजातं स्वेदजलजालम् यस्मिन् तत् (बहु.)। विशिथिलाश्च ते कचाः विशिथिलकचाः (कर्म.) तेषां कुलम्, तस्य मालाः यस्मिन् तत् विशिथिलकचकुलमालम् (बहु.)। भग्ना चासौ भ्रूः भग्नभ्रूः (कर्म.) भयानकं च तत् भालम् भयानकभालम् (कर्म.) भग्नभ्रुवा भयानकभालं यस्मिन् तत् (बहु.)।

**व्याकरणम् –** मुष्णतः–मुष्+शतृ+ङस्। चिच्छेद=छिद्+लिट्+तिप्+णल्।

**विशेषः –** समासबाहुल्यादिह गौडीरीतिरस्ति। अनुप्रासच्छटाऽपि दर्शनीया वर्तते।

**सरलार्थः –** ततो गौरसिंहः दक्षिणान् वामान् च शताधिकान् कृपाणमार्गान् स्वीकृतवतः दिनकरकराणां संस्पर्शेन संवर्धितचाकचक्यैः चञ्चतश्चन्द्रहासस्य चमत्कारैः चक्षूंषि चोरयतः तस्य दुष्टयवनस्य श्रमजनितैः स्वेदकणैः सिक्तम् अस्तव्यस्तकेशैर्युक्तम् भग्नभ्रुवा भयानकभालं शिरः सहसैव केनापि अदृष्टयत्नः सन् चकर्त।

**मूलम् – अथ मुनिरपि दाडिमकुसुमास्तरणाच्छन्नायामिव गाढरुधिर– दिग्धायां ज्वलदङ्गारचितायां चितायामिव वसुधायां शयानं वियुज्यमानभारत– भुवमालिङ्गन्तमिव निर्जीवीभवदङ्गबन्धचालनपरं शोणितसङ्घातव्याजेनान्तः स्थितरजोराशिमिवोदगिरन्तं कलितसायन्तनघनाडम्बरविभ्रमं सतत– ताम्रचूडभक्षणपातकेनेव ताम्रीकृतं छिन्नकन्धरं यवनहतकमवलोक्य सहर्षं ससाधुवादं सरोमोद्गमञ्च गौरसिंहमाश्लिष्य, भ्रूभङ्गमात्राज्ञप्तेन भृत्येन मृतककञ्चुककटि– बन्धोष्णीषादिकमन्विष्यानीतम् पत्रमेकमादाय सगणः स्वकुटीरं प्रविवेश।**

**प्रसङ्गः –** गद्यांशेऽस्मिन् कन्यापहरणपरस्य यवनस्य वधात् प्रसन्नो मुनिः गौरसिंहमालिङ्गते–

**व्याख्या –** अथ=यवनवधानन्तरम्, मुनिरपि=गुरुरपि, दाडिम– कुसुमास्तरणाच्छन्नायाम्= करकपुष्पासनयुक्तायाम्, इव, गाढरुधिरदिग्धायाम्= घनशोणितलिप्तायाम्, ज्वलदङ्गारचितायां= प्रज्वलदङ्गारपूर्णायाम्, चितायाम्= चित्याम्, इव, वसुधायाम्=भूम्याम्, शयानम्=सुप्तम्, वियुज्यमानभारतभुवम्= त्यज्यमान– भारतभूमिम्, आलिङ्गन्तमिव= आश्लिष्यन्तमिव, निर्जीवीभवदङ्गबन्ध– चालनपरम्=नश्यदङ्गसन्धिसञ्चालनतत्परम्, शोणितसङ्घातव्याजेन= रुधिरप्रवाहच्छलेन, अन्तःस्थित–रजोराशिम्= आभ्यन्तरस्थरजोगुणसमूहम्, उद्गिरन्तम्=वमन्तम्, इव=यथा, कलित–सायन्तनघनाडम्बरविभ्रमम्= धृतसायंकालिकमेघाडम्बरविलासम्, सततताम्रचूडभक्षणपातकेन=अनवरत– कुक्कुटभोजनपापेन, ताम्रीकृतम्= रक्तीकृतम्, इव, छिन्नकन्धरम्= भिन्नग्रीवम्, यवनहतकम्=दुष्टम्लेच्छम्, अवलोक्य=दृष्ट्वा, सहर्षम्= आनन्दपूर्वकम्, ससाधुवादम्=प्रशंसापूर्वकम् सरोमोद्गमम्=सरोमाञ्चम्, च, गौरसिंहम्, आश्लिष्य=आलिङ्ग्य, भ्रूभङ्गमात्राऽऽज्ञप्तेन= भ्रूसंकेतादिष्टेन, भृत्येन=सेवकेन, मृतककञ्चुक कटिबन्धोष्णीषादिकम् =मृतयवनचोलककटिवस्त्र– शिरोवेष्टनादिकम्, अन्विष्य=अन्वेषणं कृत्वा, आनीतम्=प्रापितम्, एकं पत्रम् आदाय=नीत्वा, सगणः= शिष्यादिभिः सहितः, स्वकुटीरम्=निजपत्रोटजम्, प्रविवेश=प्राविशत्।

**समासविग्रहाः –** दाडिमस्य कुसुमानि, तेषाम् आस्तरणम् दाडिमकुसुमास्तरणम् (ष.त.), तेन आच्छन्ना, तस्याम्। गाढञ्च तद् रुधिरम् (कर्म.) तेन लिप्ता गाढरुधिरलिप्ता (तृ.त.) तस्याम्। ज्वलन्तश्च ते अङ्गाराः ज्वलदङ्गाराः (कर्म.), तैः चिता, तस्याम्। वियुज्यमाना चासौ भारतभूः (कर्म.) ताम्। निर्जीवीभवन्तः च ते अङ्ग बन्धाः (कर्म.) तेषां चालनम्, तस्मिन् परः, तम्। शोणितस्य सङ्घातः, तस्य व्याजः (ष.त.), तेन। अन्तःस्थितश्चासौ रजोराशिः (कर्म.), तम्। सायंतनश्चासौ घनाडम्बरः, तस्य विभ्रमः सायंतनघनाडम्बरविभ्रमः, कलितः सायंतनघनाडम्बरविभ्रमः येन सः, (बहु.) तम्। ताम्रचूडस्य भक्षणम् तस्य पातकम् (ष.त.), तेन। छिन्ना कन्धरा यस्य सः (बहु.) तम्।

**व्याकरणम् –** आच्छन्ना–आङ्+छद्+क्त+टाप्। दिग्धा–दिह्+क्त+टाप्। चिता–चि+क्त+टाप्। शयानम्–शीङ्+शानच्+अम्। आलिङ्गन्तम्=आङ्.+लिङ्.ग+शतृ+अम्। निर्जीवीभवत्–निर्+जीव्+च्वि+भू+शतृ। छिन्न छिद्+ क्त। आश्लिष्य–आङ्+श्लिष्+क्त्वा >ल्यप्। उद्गिरन्तम्– उद्+गिर्+ शतृ+अम्।

**विशेषः –** अत्र 'चितायामिव वसुधायाम्' इत्यत्रोपमा, अन्यत्र चोत्प्रेक्षा विद्यते। 'चितायां चितायाम्' इत्यत्र यमकमनुप्रासश्च बहुत्र दृश्यते। समासबाहुल्याद् गौडीरीतिरस्ति।

**सरलार्थः –** ततः दाडिमपुष्पास्तरणयुक्तामिव गाढरक्तव्याप्तायाम् (अत एव) ज्वलदङ्गारपूर्णायां चितायामिव भूमौ शयानम्, (अत एव) वियुज्यमान– भारतभूमिम् आलिङ्.गनपरम् इव प्रतीयमानम्, नश्यदङ्गबन्धचालनपरम्, शोणितप्रवाह कपटेन अन्तः स्थितं रजोराशिम् उद्गिरन्तम्, सायंकालिक–मेघविलासं धारयन्तम्, निरन्तरं कुक्कुटभक्षणजन्यपापेन ताम्रीकृतम् इव प्रतीयमानम्, छिन्नकन्धरं दुष्टम्लेष्च्छं दृष्ट्वा मुनिरपि सहर्ष ससाधुवादं सरोमाञ्चं च गौरसिंहम् आलिङ्ग्य भ्रूभङ्गेन आदिष्टेन भृत्येन हतस्य यवनस्य चोलकादिकम् अन्विष्य आनीतं पत्रमादाय सगणः स्वकुटीरं प्रविवेश।

**। इति शिवराजविजये प्रथमविरामे प्रथमो निःश्वासः।**